# भाषाकौशलम्

प्रधानसम्पादकः
प्रो. श्रीनिवासः वरखेडी

सम्पादकौ
देवानन्द शुक्ल
प्रीति शुक्ला

केन्द्रीयसंस्कृतविश्वविद्यालयः
दिल्ली

# आमुखम्

संस्कृतभाषायाः इतिहासोऽत्यन्तः प्राचीनो वरीवर्त्ति। सुरभारतीयम् एतादृशे महत्तमे भारतवर्षे परिव्याप्ता वर्तते यत्रत्या जनाः प्रारम्भकालादेव स्वस्मिन् वाग्व्यवहारे दैनिन्दिने नैकासां भाषाणां प्रयोगः क्रियमाणा दरीदृश्यन्ते। भारतीयसङ्घेन तथा च संविधानेन सम्मान्यभाषासु संस्कृतमप्येकस्याः मान्यभाषायाः स्वरूपे स्वीकृता विद्यते। संस्कृतं सर्वासां भाषाणां जननी, सर्वजनोच्चशिखरप्रापिका भाषाऽस्ति। द्रविडेत्यादीनामन्यासां भाषाणामुपरि प्रभावोऽस्याः सुस्पष्टरूपेण दृग्गोचरीभवति।

भाषायाः अवबोधने कोशस्य महती भूमिका भवति येन शब्दानां लिङ्गज्ञानं पर्यायज्ञानञ्च भवति। शब्दानामध्ययनदिशा भारतीयपरम्परायाम् अमरकोशस्य स्थानवैशिष्ट्यं सिद्ध्यति। उद्देश्यमिदं लक्ष्यीकृत्य लिङ्गानुशासनस्य अमरकोशस्य सिद्धान्तममुं आधारीकृत्य पाठ्यक्रमेऽस्मिन् अमरकोशग्रन्थस्य स्वर्गवर्गः छात्राणां कृते अध्ययनार्थं निर्द्धारितः। वाक्यार्थज्ञाने पदपदार्थज्ञानं कारणं भवति इति धिया शब्दज्ञानानन्तरं श्रीमद्भगवद्गीतायाः द्वादशाध्यायः एवं कानिचन सुभाषितानि अपि पाठ्यक्रमे समाविष्टानि सन्ति।

संस्कृतस्य अवबोधने शब्दरूपाणां धातुरूपाणाञ्च महत्त्वपूर्णं स्थानमस्ति। अतो दृष्टिमिमामनुचिन्तयन् प्राक्शास्त्रिद्वितीयसत्रार्द्धस्य पाठ्यक्रमे संस्कृताध्ययनप्रवृत्तैर्विद्यार्थिभ्यः आदर्शरूप-दृष्ट्या शब्दरूपाणाम् धातुरूपाणाञ्च पाठ्यक्रमः निर्द्धारितः।

आगच्छन्तु वयं सर्वे क्रमशः स्वीयमध्ययनं प्रारम्भं कुर्वाणाः पाठ्यक्रमेण सह नैजं पाठस्याभ्यासं कुर्मः।

देवानन्द शुक्ल एवं प्रीति शुक्ला

# विषयानुक्रमणी

## नामलिङ्गानुऽशासनं नाम अमरकोषः (प्रथमं काण्डम् : स्वर्गवर्गः)


| नाम | श्लोक | नाम | श्लोक | नाम | श्लोक | नाम | श्लोक |
|---|---|---|---|---|---|---|---|
| अग्निः | ६४, ६५, ६६, | कामबाणः | २९, ३०, | पार्वती | ४५, ४६, ४७ | विष्णुशङ्खः | ३३ |
| | ६७, ६८ | कार्तिकेयः | ४८, ४९, ५० | बडवाग्निः | ६८ | विष्णोः अश्वः | ३४ |
| अग्निकणः | ६९ | किन्नरः | ८४ | बलभद्रः | २५, २६ | विष्णोः मणिः | ३३ |
| अग्निज्वाला | ६८ | कुबेरः | ८१, ८२ | बुद्धः | १३, १४ | विष्णोः मन्त्रिः | ३५ |
| अग्नितापः | ६९ | कुबेरपुरी | ८२ | ब्रह्मा | १६, १७, १८ | विष्णोः सारथिः | ३५ |
| अग्नेः निर्गतज्वाला | ६९ | कुबेरविमानम् | ८३ | भस्मन् | ६९, ७० | वेगः | ७७ |
| अणुताद्यष्टविधप्रभावः | | कुबेरस्थानम् | ८२ | मञ्जुघोषा अप्सरा | ६३ | शक्तिदेवता | ४३ |
| | ४४ | कुबेरस्य उद्यानम् | ८२ | महावायुः | ७६ | शची | ५५ |
| अतिशयः | ७९, ८० | कृष्णानुजः | ३५ | मेनका अप्सरा | ६३ | शरीरवायुः | ७६ |
| अप्सरस् | ६२ | गणदेवता | १० | मेरुपर्वतः | ६० | शाक्यः | १४, १५ |
| अमृतम् | ५९ | गणेशः | ४७, ४८ | यमः | ७०, ७१ | शिवः | ३६, ३७, ३८, |
| अविरतम् | ७८, ७९ | गरुडः | ३५, ३६ | रम्भा अप्सरा | ६३ | | ३९, ४०, ४१ |
| अश्विनीकुमारौ | ६१, ६२ | घृताची अप्सरा | ६३ | राक्षसः | ७२, ७३ | शिवधनुः | ४२ |
| असुरः | १२ | चर्ममुण्डा | ५१ | लक्ष्मी | ३१, ३२, | शिवस्य जटाबन्धः | ४२ |
| इन्द्रः | ५१, ५२, ५३, | जयन्तः | ५६ | वनवह्निः | ७० | शिवानुचरः | ४२ |
| | ५४, ५५ | तिलोत्तमा अप्सरा | ६३ | वरुणः | ७३ | शीघ्रम् | ७७, ७८ |
| इन्द्रगृहम् | ५६ | देवः | ७, ९ | वसुदेवः | २४ | सनत्कुमारः | ६१ |
| इन्द्रपुरः | ५५ | देवगङ्गा | ५९ | वायुः | ७४, ७५ | सवृष्टिकः वायुः | ७६ |
| इन्द्रवनम् | ५६ | देवगायकः | ६४ | विशेषनिधिः | ८४, ८५ | सामान्यनिधिः | ८४ |
| इन्द्रसारथिः | ५६ | देवयोनिः | ११ | विष्णुः | १९, २०, २१, | सिद्धिः | ४४, ४५ |
| इन्द्रस्य वज्र | ५७,५८ | देवरथः | ५८ | | २२, २३, २४ | सुकेशी अप्सरा | ६३ |
| इन्द्रहस्तिः | ५७ | देवर्षिः | ५८ | विष्णुखड्गः | ३३ | स्वर्गः | ६ |
| इन्द्राश्वः | ५६ | देववृक्षः | ६०, ६१ | विष्णुगदा | ३३ | हाहानामदेवगायकः | ६४ |
| उर्वशी अप्सरा | ६३ | देवसभा | ५९ | विष्णुचक्रम् | ३३ | हूहूनामदेवगायकः | ६४ |
| कामदेवः | २७, २८ | नन्दिः | ५० | विष्णुचापः | ३४, | | |
| कामदेवस्य पुत्राः | ३१, | नलकूबरः | ८२ | विष्णुलाञ्छनम् | ३४ | | |

# श्रीमद्भगवद्गीता :

## द्वादशोध्यायः - भक्तियोगः

## श्लोकानुक्रमणिका


| श्लोकः | सं. | श्लोकः | सं. |
|---|---|---|---|
| अथ चित्तं समाधातुं | ॥९॥ | मय्येव मन आधत्स्व | ॥८॥ |
| अथैतदप्यशक्तोऽसि | ॥११॥ | यस्मान्नोद्विजते लोको | ॥१५॥ |
| अद्वेष्टा सर्वभूतानां | ॥१३॥ | ये तु धर्म्यामृतमिदं | ॥२०॥ |
| अनपेक्षः शुचिर्दक्षः | ॥१६॥ | ये तु सर्वाणि कर्माणि | ॥६॥ |
| अभ्यासेऽप्यसमर्थोऽसि | ॥१०॥ | ये त्वक्षरमनिर्देश्यम् | ॥३॥ |
| एवं सततयुक्ता ये | ॥१॥ | यो न हृष्यति न द्वेष्टि | ॥१७॥ |
| क्लेशोऽधिकतरस्तेषाम् | ॥५॥ | श्रेयो हि ज्ञानमभ्यासाद् | ॥१२॥ |
| तुल्यनिन्दास्तुतिर्मौनी | ॥१९॥ | सन्तुष्टः सततं योगी | ॥१४॥ |
| तेषामहं समुद्धर्ता | ॥७॥ | सन्नियम्येन्द्रियग्रामं | ॥४॥ |
| मय्यावेश्य मनो ये मां | ॥२॥ | समः शत्रौ च मित्रे च | ॥१८॥ |

## ॥ सुभाषितानि ॥


| श्लोकस्य पूर्वार्द्धः | श्लोकसं. | श्लोकस्य पूर्वार्द्धः | श्लोकसं. | श्लोकस्य पूर्वार्द्धः | श्लोकसं. |
|---|---|---|---|---|---|
| अञ्जलिस्थानि | ॥०५॥ | द्वावेव पुरुषो लोके | ॥१६॥ | रे रे चातक! सावधान० | ॥३८॥ |
| अनेकशास्त्रं | ॥२८॥ | न हायनैर्न पलितैर्न | ॥२०॥ | रोहणं सूक्तिरत्नानां | ॥०४॥ |
| अपेक्षन्ते न च | ॥०७॥ | नागो भाति मदेन | ॥४४॥ | वागीशाद्याः सुमनसः | ॥०१॥ |
| अमन्त्रमक्षरं नास्ति | ॥१०॥ | पिबन्ति नद्यः | ॥२३॥ | विद्या नाम नरस्य | ॥३७॥ |
| आरम्भगुर्वी | ॥२५॥ | प्रारभ्यते न खलु | ॥३३॥ | विद्यातीर्थे जगति | ॥४९॥ |
| एकेन राजहंसेन | ॥१२॥ | प्रियप्राया वृत्तिः | ॥४७॥ | विपदि धैर्यमथ | ॥२१॥ |
| केचिन्नाम वदन्तु | ॥४२॥ | प्रियवाक्यप्रदानेन | ॥०८॥ | वृत्तं यत्नेन संरक्षेद् | ॥१३॥ |
| केयूराणि न | ॥३५॥ | भवन्ति नम्रास्तरवः | ॥२७॥ | शारदा शारदाम्भोज० | ॥०२॥ |
| क्वचित् पृथ्वीशय्यः | ॥४६॥ | भोगे रोगभयं कुले | ॥४०॥ | शास्त्रेषु निष्ठा | ॥३१॥ |
| गीर्भिर्गुरूणां | ॥२९॥ | मनसि वचसि | ॥३४॥ | श्रूयतां धर्मसर्वस्वं | ॥१४॥ |
| गुणा गुणज्ञेषु | ॥२२॥ | मित्रं स्वच्छतया रिपुं | ॥४३॥ | श्रेयो नूनं व्रजति | ॥५०॥ |
| गुणेष्वेव हि कर्तव्यः | ॥१५॥ | मौनान्मूकः प्रवचन० | ॥४५॥ | सत्यं ब्रूयात् प्रियं | ॥१७॥ |
| चारः प्रथमो धर्मः | ॥११॥ | यत्रापि कुत्रापि | ॥२६॥ | सत्यं वक्तुमशेष० | ॥४१॥ |
| जाड्यं धियो | ॥३२॥ | यथा चित्तं तथा | ॥०६॥ | सर्वदा व्यवहारे | ॥१८॥ |
| जितेन्द्रियत्वं | ॥३०॥ | यावत्स्वस्थमिदं | ॥३९॥ | साहित्यसङ्गीत० | ॥२४॥ |
| तद्दिव्यमव्ययं धाम | ॥०३॥ | ये दीनेषु दयालवः | ॥३६॥ | सेवितव्यो महावृक्षः | ॥०९॥ |
| दानं भोगो नाश० | ॥१९॥ | रथस्यैकं चक्रं | ॥४८॥ | | |

## ॥ शब्दरूपाणि ॥


| प्रातिपदिकम् | पृष्ठसं. | प्रातिपदिकम् | पृष्ठसं. | प्रातिपदिकम् | पृष्ठसं. |
|---|---|---|---|---|---|
| राम ( पुं. ) | | श्री (स्त्री.) | | एतद् (पुं.) | |
| हरि (पुं.) | | मातृ (स्त्री.) | | एतद् (स्त्री.) | |
| गुरु (पुं.) | | अस्मद् ( अ ) | | एतद् (नपुं.) | |
| पितृ (पुं.) | | युष्मद् ( अ ) | | भवत् (पुं.) | |
| गो (पुं.) | | अदस् (पुं.) | | भवती (स्त्री.) | |
| राजन् (पुं.) | | अदस् (स्त्री.) | | सर्व (पुं.) | |
| रमा (स्त्री.) | | अदस् (नपुं.) | | सर्वा (स्त्री.) | |
| नदी (स्त्री.) | | तद् (पुं.) | | सर्व (नपुं.) | |
| मति (स्त्री.) | | तद् (स्त्री.) | | | |
| धेनु (स्त्री.) | | तद् (नपुं.) | | | |


## ॥ धातुरूपाणि ॥


| धातुः | पृष्ठसं. | धातुः | पृष्ठसं. | धातुः | पृष्ठसं. |
|---|---|---|---|---|---|
| भू (भू) सत्तायाम् (भ्वादिः ) | | षुञ् (सु) अभिषवे (स्वादिः ) | | डुक्रीञ् (क्री) द्रव्यविनिमये (क्र्यादिः ) | |
| अद (अद्) भक्षणे (अदादिः ) | | तुद (तुद्) व्यथने (तुदादिः ) | | चुर (चुर्) (चुरादिः ) | |
| हु (हु) दानादनयोः (जुहोत्यादिः ) | | रुधिर् आवरणे (रुध्) (रुधादिः) | | | |
| दिवु क्रीडाविजिगीषाव्यावहार-द्युतिस्तुतिमोदमदस्वप्नकान्ति-गतिषु (दिव्) (दिवादिः ) | | तनु (तन्) विस्तारे (तनादिः ) | | | |

# नामलिङ्गानुऽशासनं नाम अमरकोषः

## प्रथमं काण्डम्

### मङ्गलाचरणम्

*प्रारिप्सितप्रत्यूहापनुत्तये कृतं मङ्गलं शिष्यशिक्षार्थमादौ निबबन्ध -*

**यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः।**
**सेव्यतामक्षयो धीराः स श्रिये चामृताय च ॥०१॥**

यस्य ज्ञान-दया-सिन्धोः अगाधस्य अनघाः गुणाः।
सेव्यताम् अक्षयः धीराः सः श्रिये च अमृताय च ॥

*अभिधेयप्रयोजने दर्शयति –*

**समाहृत्यान्यतन्त्राणि सङ्क्षिप्तैः प्रतिसंस्कृतैः।**
**सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम्॥०२॥**

समाहृत्य अन्य-तन्त्राणि सङ्क्षिप्तैः प्रति-संस्कृतैः।
सम्पूर्णम् उच्यते वर्गैः नामलिङ्ग-अनुशासनम्॥

*लिङ्गज्ञानोपायं परिभाषते -*

**प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित्।**
**स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित्॥०३॥**

प्रायशः रूप-भेदेन साहचर्यात् च कुत्रचित्।
स्त्री-पुं-नपुंसकं ज्ञेयं तद्-विशेष-विधेः क्वचित्॥

**भेदाख्यानाय न द्वन्द्वो नैकशेषो न सङ्करः।**
**कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमादृते॥०४॥**
भेद-आख्यानाय न द्वन्द्वः न एक-शेषः न सङ्करः।
कृतः अत्र भिन्न-लिङ्गानाम् अनुक्तानाम् क्रमाद् ऋते॥

**त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति।**
**निषिद्धलिङ्गं शेषार्थं त्वन्ताथादि न पूर्वभाक्॥०५॥**
त्रि-लिङ्ग्याम् त्रिषु इति पदम् मिथुने तु द्वयोः इति।
निषिद्ध-लिङ्गम् शेष-अर्थम् तु अन्त-अथ-आदि न पूर्वभाक्॥

---

# ॥ अथ स्वर्गवर्गः ॥

**स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः।**
**सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम्॥०६॥**
स्वर् अव्ययं स्वर्ग-नाक-त्रिदिव-त्रिदशालयाः।
सुर-लोकः द्यो-दिवौ द्वे स्त्रियाम् क्लीबे त्रिविष्टपम्॥

**स्वर्गः** - स्वर् (अ.) स्वर्ग (पुं.) नाक (पुं.) त्रिदिव (पुं.) त्रिदशालय (पुं.) सुरलोक (पुं.) द्यो (स्त्री.) दिव् (स्त्री.) त्रिविष्टप (नपुं.)

**अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः।**
**सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः॥०७॥**
अमराः निर्जराः देवाः त्रिदशाः विबुधाः सुराः।
सुपर्वाणः सुमनसः त्रिदिवेशा दिवौकसः॥

**देवः** - अमर (पुं.) निर्जर (पुं.) देव (पुं.) त्रिदश (पुं.) विबुध (पुं.) सुर (पुं.) सुपर्वन् (पुं.) सुमनस् (पुं.) त्रिदिवेश (पुं.) दिवौकस् (पुं.)

**आदितेया दिविषदो लेखा अदितिनन्दनाः।**
**आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः॥०८॥**

आदितेयाः दिविषदः लेखाः अदिति-नन्दनाः।
आदित्याः ऋभवः अस्वप्नाः अमर्त्याः अमृत-अन्धसः॥

**देवः -** आदितेय (पुं.) दिविषद् (पुं.) लेख (पुं.) अदितिनन्दन (पुं.) आदित्य (पुं.) ऋभव (पुं.) अस्वप्न (पुं.) अमर्त्य (पुं.) अमृतान्धस् (पुं.)

**बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः।**
**वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम्॥०९॥**

बर्हिर्मुखाः क्रतुभुजः गीर्वाणाः दानव-अरयः।
वृन्दारकाः दैवतानि पुंसि वा देवताः स्त्रियाम्॥

**देवः -** बर्हिर्मुख (पुं.) क्रतुभुज् (पुं.) गीर्वाण (पुं.) दानवारि (पुं.) वृन्दारक (पुं.) दैवत (पुं./नपुं.) देवता (स्त्री.)

**आदित्यविश्ववसवस्तुषिताभास्वरानिलाः।**
**महाराजिकसाध्याश्च रुद्राश्च गणदेवताः॥१०॥**

आदित्य-विश्व-वसवः तुषित-आभास्वर-अनिलाः।
महा-राजिक-साध्याः च रुद्राः च गण-देवताः॥

**गणदेवता -** आदित्य (पुं.) विश्व (नपुं.) वसु (पुं.,नित्यबहु.) तुषित (पुं.,नित्यबहु.) आभास्वर (पुं.) अनिल (पुं.) महाराजिक (पुं.,नित्यबहु.) साध्य (पुं.,नित्यबहु.) रुद्र (पुं.)

**विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः।**
**पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः॥११॥**

विद्याधरः अप्सरः यक्ष-रक्षस्-गन्धर्व-किन्नराः।
पिशाचः गुह्यकः सिद्धः भूतः अमी देव-योनयः॥

**देवयोनिः -** विद्याधर (पुं.) अप्सरस् (स्त्रीलिङ्गः,नित्यबहुवचनान्तः) यक्ष (पुं.) रक्षस् (पुं.) गन्धर्व (पुं.) किन्नर (पुं.) पिशाच (पुं.) गुह्यक (पुं.) सिद्ध (पुं.) भूत (नपुं.)

**असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः।**

**शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः॥१२॥**

असुराः दैत्य-दैतेय-दनुज-इन्द्र-अरि-दानवाः।

शुक्र-शिष्याः दिति-सुताः पूर्व-देवाः सुर-द्विषः॥

**असुरः -** असुर (पुं.) दैत्य (पुं.) दैतेय (पुं.) दनुज (पुं.) इन्द्रारि (पुं.) दानव (पुं.) शुक्रशिष्य (पुं.) दितिसुत (पुं.) पूर्वदेव (पुं.) सुरद्विष् (पुं.)

**सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः।**

**समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः॥१३॥**

सर्वज्ञः सुगतः बुद्धः धर्मराजः तथागतः।

समन्त-भद्रः भगवान् मारजित् लोकजित् जिनः॥

**बुद्धः/जिन -** सर्वज्ञ (पुं.) सुगत (पुं.) बुद्ध (पुं.) धर्मराज (पुं.) तथागत (पुं.) समन्तभद्र (पुं.) भगवत् (पुं.) मारजित् (पुं.) लोकजित् (पुं.) जिन (पुं.)

**षडभिज्ञो दशबलोऽद्वयवादी विनायकः।**

**मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः॥१४॥**

षडभिज्ञः दश-बलः अद्वय-वादी विनायकः।

मुनीन्द्रः श्री-घनः शास्ता मुनिः शाक्य-मुनिः तु यः॥

**बुद्धः -** षडभिज्ञ (पुं.) दशबल (पुं.) अद्वयवादिन् (पुं.) विनायक (पुं.) मुनीन्द्र (पुं.) श्रीघन (पुं.) शास्तृ (पुं.) मुनि (पुं.)

**स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः।**

**गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः॥१५॥**

सः शाक्य-सिंहः सर्व-अर्थ-सिद्धः शौद्धोदनिः च सः।

गौतमः च अर्कबन्धुः च माया-देवी-सुतः च सः॥

**शाक्यः** शाक्यसिंह (पुं.) सर्वार्थसिद्ध (पुं.) शौद्धोदनि (पुं.) गौतम (पुं.) अर्कबन्धु (पुं.) मायादेवीसुत (पुं.)

**ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः।**

**हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः॥१६॥**

ब्रह्म-आत्म-भूः सुर-ज्येष्ठः परमेष्ठी पितामहः।

हिरण्य-गर्भः लोकेशः स्वयं-भूः चतुर्-आननः॥

**ब्रह्मा -** ब्रह्मन् (पुं.) आत्मभू (पुं.) सुरज्येष्ठ (पुं.) परमेष्ठिन् (पुं.) पितामह (पुं.) हिरण्यगर्भ (पुं.) लोकेश (पुं.) स्वयम्भू (पुं.) चतुरानन (पुं.)

**धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः**
**स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्विधिः॥१७॥**

धाता अब्ज-योनिः द्रुहिणः विरिञ्चिः कमल-आसनः
स्रष्टा प्रजा-पतिः वेधा विधाता विश्व-सृड् विधिः॥१७॥

**ब्रह्मा -** धातृ (पुं.) अब्जयोनि (पुं.) द्रुहिण (पुं.) विरिञ्चि (पुं.) कमलासन (पुं.) स्रष्टृ (पुं.) प्रजापति (पुं.) वेधस् (पुं.) विधातृ (पुं.) विश्वसृज् (पुं.) विधि (पुं.)

**नाभिजन्माण्डजः पूर्वो निधनः कमलोद्भवः।**
**सदानन्दो रजोमूर्तिः सत्यको हंसवाहनः॥१८॥**

नाभि-जन्म अण्डजः पूर्वः निधनः कमल-उद्भवः।
सदा-आनन्दः रजो-मूर्तिः सत्यकः हंस-वाहनः॥

**ब्रह्मा -** नाभिजन्मन् (पुं.) अण्डज (पुं.) पूर्व (पुं.) निधन (पुं./नपुं.) कमलोद्भव (पुं.) सदानन्द (पुं.) रजोमूर्तिन् (पुं.) सत्यक (पुं.) हंसवाहन (पुं.)

**विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः।**
**दामोदरो हृषीकेशः केशवो माधवः स्वभूः॥१९॥**

विष्णुः नारायणः कृष्णः वैकुण्ठः विष्टर-श्रवाः।
दामोदरः हृषीकेशः केशवः माधवः स्वभूः॥

**विष्णुः -** विष्णु (पुं.) नारायण (पुं.) कृष्ण (पुं.) वैकुण्ठ (पुं.) विष्टरश्रवस् (पुं.) दामोदर (पुं.) हृषीकेश (पुं.) केशव (पुं.) माधव (पुं.) स्वभू (पुं.)

**दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः।**
**पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः॥२०॥**

दैत्यारिः पुण्डरी-काक्षः गोविन्दः गरुड-ध्वजः।
पीत-अम्बरः अच्युतः शार्ङ्गी विष्वक्सेनः जनार्दनः॥

**विष्णुः -** दैत्यारि (पुं.) पुण्डरीकाक्ष (पुं.) गोविन्द (पुं.) गरुडध्वज (पुं.) पीताम्बर (पुं.) अच्युत (पुं.) शार्ङ्गिन् (पुं.) विष्वक्सेन (पुं.) जनार्दन (पुं.)

**उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः।**
**पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः॥२१॥**

उपेन्द्रः इन्द्र-आवरजः चक्र-पाणिः चतुर्-भुजः।
पद्म-नाभः मधु-रिपुः वासुदेवः त्रिविक्रमः॥

**विष्णुः -** उपेन्द्र (पुं.) इन्द्रावरज (पुं.) चक्रपाणि (पुं.) चतुर्भुज (पुं.) पद्मनाभ (पुं.) मधुरिपु (पुं.) वासुदेव (पुं.) त्रिविक्रम (पुं.)

**देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः।**
**वनमाली बलिध्वंसी कंसारातिरधोक्षजः॥२२॥**

देवकी-नन्दनः शौरिः श्रीपतिः पुरुष-उत्तमः।
वन-माली बलि-ध्वंसी कंस-आरातिः अधो-क्षजः॥

**विष्णुः -** देवकीनन्दन (पुं.) शौरि (पुं.) श्रीपति (पुं.) पुरुषोत्तम (पुं.) वनमालिन् (पुं.) बलिध्वंसिन् (पुं.) कंसाराति (पुं.) अधोक्षज (पुं.)

**विश्वम्भरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः।**
**पुराणपुरुषो यज्ञपुरुषो नरकान्तकः॥२३॥**

विश्वम्-भरः कैटभ-जित् विधुः श्री-वत्स-लाञ्छनः।
पुराण-पुरुषः यज्ञ-पुरुषः नरक-अन्तकः॥

**विष्णुः -** विश्वम्भर (पुं.) कैटभजित् (पुं.) विधु (पुं.) श्रीवत्सलाञ्छन (पुं.) पुराणपुरुष (पुं.) यज्ञपुरुष (पुं.) नरकान्तक (पुं.)

**जलशायी विश्वरूपो मुकुन्दो मुरमर्दनः।**
**वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः॥२४॥**

जल-शायी विश्व-रूपः मुकुन्दः मुर-मर्दनः।
वसु-देवः अस्य जनकः सः एव आनक-दुन्दुभिः॥

**विष्णुः -** जलशायिन् (पुं.) विश्वरूप (पुं.) मुकुन्द (पुं.) मुरमर्दन (पुं.)
**वसुदेवः -** वसुदेव (पुं.) आनकदुन्दुभि (पुं.)

**बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः।**
**रेवतीरमणो रामः कामपालो हलायुधः॥२५॥**

बलभद्रः प्रलम्ब-घ्नः बल-देवः अच्युत-अग्रजः।
रेवती-रमणः रामः काम-पालः हलायुधः॥

**बलभद्रः -** बलभद्र (पुं.) प्रलम्बघ्न (पुं.) बलदेव (पुं.) अच्युताग्रज (पुं.) रेवतीरमण (पुं.) राम (पुं.) कामपाल (पुं.) हलायुध (पुं.)

**नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली।**
**सङ्कर्षणः सीरपाणिः कालिन्दीभेदनो बलः॥२६॥**

नील-अम्बरः रौहिणेयः तालाङ्कः मुसली हली।
सङ्कर्षणः सीरपाणिः कालिन्दी-भेदनः बलः॥

**बलभद्रः -** नीलाम्बर (पुं.) रौहिणेय (पुं.) तालाङ्क (पुं.) मुसलिन् (पुं.) हलिन् (पुं.) सङ्कर्षण (पुं.) सीरपाणि (पुं.) कालिन्दीभेदन (पुं.) बल (पुं.)

**मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः।**
**कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः॥२७॥**

मदनः मन्मथः मारः प्रद्युम्नः मीन-केतनः।
कन्दर्पः दर्पकः अनङ्गः कामः पञ्च-शरः स्मरः॥

**कामदेवः -** मदन (पुं.) मन्मथ (पुं.) मार (पुं.) प्रद्युम्न (पुं.) मीनकेतन (पुं.) कन्दर्प (पुं.) दर्पक (पुं.) अनङ्ग (पुं.) काम (पुं.) पञ्चशर (पुं.) स्मर (पुं.)

**शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः।**
**पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः॥२८॥**

शम्बर-अरिः मन-सिजः कुसुमेषु अनन्यजः।
पुष्प-धन्वा रति-पतिः मकर-ध्वजः आत्म-भूः॥

**कामदेवः -** शम्बरारि (पुं.) मनसिज (पुं.) कुसुमेषु (पुं.) अनन्यज (पुं.) पुष्पधन्वन् (पुं.) रतिपति (पुं.) मकरध्वज (पुं.) आत्मभू (पुं.)

**अरविन्दमशोकं च चूतं च नवमल्लिका।**
**नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः॥२९॥**

अरविन्दम् अशोकम् च चूतम् च नव-मल्लिका।
नील-उत्पलम् च पञ्च एते पञ्च-बाणस्य सायकाः॥

**कामबाणः -** अरविन्द (नपुं.) अशोक (नपुं.) चूत (पुं.) नवमल्लिका (स्त्री.) नीलोत्पल (नपुं.)
**कामदेवः -** पञ्चबाण (पुं.)

**उन्मादनस्तापनश्च शोषणः स्तम्भनस्तथा।**
**सम्मोहनश्च कामस्य पञ्च बाणाः प्रकीर्तिताः ॥३०॥**

उन्मादनः तापनः च शोषणः स्तम्भनः तथा।
सम्मोहनः च कामस्य पञ्च बाणाः प्रकीर्तिताः ॥

**कामबाणः -** उन्मादन (नपुं.) तापन (नपुं.) शोषण (नपुं.) स्तम्भन (नपुं.) सम्मोहन (नपुं.)

**ब्रह्मसूर्विश्वकेतुः स्यादनिरुद्ध उषापतिः।**
**लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया॥३१॥**

ब्रह्म-सूः विश्व-केतुः स्याद् अनिरुद्धः उषा-पतिः।
लक्ष्मीः पद्म-आलया पद्मा कमला श्रीः हरि-प्रिया॥

**कामदेवः -** ब्रह्मसू (पुं.) विश्वकेतु (पुं.)
**अनिरुद्धः -** अनिरुद्ध (पुं.) उषापति (पुं.)
**लक्ष्मी -** लक्ष्मी (स्त्री.) पद्मालया (स्त्री.) पद्मा (स्त्री.) कमला (स्त्री.) श्री (स्त्री.) हरिप्रिया (स्त्री.)

**इन्दिरा लोकमाता मा क्षीरोदतनया रमा।**
**भार्गवी लोकजननी क्षीरसागरकन्यका॥३२॥**

इन्दिरा लोक-माता मा क्षीर-उद-तनया रमा।
भार्गवी लोक-जननी क्षीर-सागर-कन्यका॥

**लक्ष्मी -** इन्दिरा (स्त्री.) लोकमातृ (स्त्री.) मा (स्त्री.) क्षीरोदतनया (स्त्री.) रमा (स्त्री.) भार्गवी (स्त्री.) लोकजननी (स्त्री.) क्षीरसागरकन्यका (स्त्री.)

**शङ्खो लक्ष्मीपतेः पाञ्चजन्यश्चक्रं सुदर्शनः।**
**कौमोदकी गदा खड्गो नन्दकः कौस्तुभो मणिः॥३३॥**

शङ्खः लक्ष्मी-पतेः पाञ्चजन्यः चक्रं सुदर्शनः।
कौमोदकी गदा खड्गः नन्दकः कौस्तुभः मणिः॥

**विष्णुशङ्खः -** पाञ्चजन्य (पुं.)
**विष्णुचक्रम् -** सुदर्शन (पुं./नपुं.)
**विष्णुगदा -** कौमोदकी (स्त्री.)
**विष्णुखड्गः -** नन्दक (पुं.)
**विष्णुमणिः -** कौस्तुभ (पुं.)

**चापः शार्ङ्गं मुरारेस्तु श्रीवत्सो लाञ्छनं स्मृतम्।**
**अश्वाश्च शैव्यसुग्रीवमेघपुष्पबलाहकाः॥३४॥**

चापः शार्ङ्गम् मुरारेः तु श्री-वत्सः लाञ्छनम् स्मृतम्।
अश्वाः च शैव्य-सुग्रीव-मेघ-पुष्प-बलाहकाः॥

**विष्णुचापः -** शार्ङ्ग (पुं.) **विष्णुलाञ्छनम् -** श्रीवत्स (पुं.)
**विष्णोः अश्वः -** शैव्य (पुं.) सुग्रीव (पुं.) मेघपुष्प (नपुं.) बलाहक (पुं.)

**सारथिर्दारुको मन्त्री ह्युद्धवश्चानुजो गदः।**
**गरुत्मान्गरुडस्ताक्ष्यो वैनतेयः खगेश्वरः॥३५॥**

सारथिः दारुकः मन्त्री हि उद्धवः च अनुजः गदः।
गरुत्मान् गरुडः ताक्ष्यः वैनतेयः खगेश्वरः॥

**विष्णुसारथिः -** दारुक (पुं.) **विष्णुमन्त्रिः -** उद्धव (पुं.)
**कृष्णानुजः -** गद (पुं.)
**गरुडः -** गरुत्मत् (पुं.) गरुड (पुं.) ताक्ष्य (पुं.) वैनतेय (पुं.) खगेश्वर (पुं.)

**नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः।**
**शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः॥३६॥**

नाग-अन्तकः विष्णु-रथः सुपर्णः पन्नग-आशनः ।
शम्भुः ईशः पशु-पतिः शिवः शूली महेश्वरः॥

**गरुडः -** नागान्तक (पुं.) विष्णुरथ (पुं.) सुपर्ण (पुं.) पन्नगाशन (पुं.)
**शिवः -** शम्भु (पुं.) ईश (पुं.) पशुपति (पुं.) शिव (पुं.) शूलिन् (पुं.) महेश्वर (पुं.)

**ईश्वरः शर्व ईशानः शङ्करश्चन्द्रशेखरः।**
**भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः॥३७॥**

ईश्वरः शर्वः ईशानः शङ्कः चन्द्र-शेखरः ॥
भूतेशः खण्ड-परशुः गिरि-ईशः गिरिशः मृडः।

**शिवः -** ईश्वर (पुं.) शर्व (पुं.) ईशान (पुं.) शङ्कर (पुं.) चन्द्रशेखर (पुं.) भूतेश (पुं.) खण्डपरशु (पुं.) गिरीश (पुं.) गिरिश (पुं.) मृड (पुं.)

**मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः।**
**उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत् ॥३८॥**

उग्रः कपर्दी श्री-कण्ठः शिति-कण्ठः कपाल-भृत्।
मृत्युञ्जयः कृत्ति-वासाः पिनाकी प्रमथ-अधिपः ॥

**शिवः -** मृत्युञ्जय (पुं.) कृत्तिवासस् (पुं.) पिनाकिन् (पुं.) प्रमथाधिप (पुं.) उग्र (पुं.) कपर्दिन् (पुं.) श्रीकण्ठ (पुं.) शितिकण्ठ (पुं.) कपालभृत् (पुं.)

**वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः।**
**कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः॥३९॥**

वाम-देवः महा-देवः विरूपाक्षः त्रि-लोचनः ।
कृश-अनुरेताः सर्वज्ञः धूर्जटिः नील-लोहितः॥

**शिवः -** वामदेव (पुं.) महादेव (पुं.) विरूपाक्ष (पुं.) त्रिलोचन (पुं.) कृशानुरेतस् (पुं.) सर्वज्ञ (पुं.) धूर्जटि (पुं.) नीललोहित (पुं.)

**हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः।**
**गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः॥४०॥**

हरः स्मर-हरः भर्गः त्र्यम्बकः त्रिपुरान्तकः।
गङ्गा-धरः अन्धक-रिपुः क्रतु-ध्वंसी वृष-ध्वजः॥

**शिवः -** हर (पुं.) स्मरहर (पुं.) भर्ग (पुं.) त्र्यम्बक (पुं.) त्रिपुरान्तक (पुं.) गङ्गाधर (पुं.) अन्धकरिपु (पुं.) क्रतुध्वंसिन् (पुं.) वृषध्वज (पुं.)

**व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः।**
**अहिर्बुध्न्योऽष्टमूर्तिश्च गजारिश्च महानटः॥४१॥**

व्योम-केशः भवः भीमः स्थाणू रुद्र उमा-पतिः।
अहिर्बुध्न्यः अष्ट-मूर्तिः च गज-अरिः च महा-नटः॥

**शिवः -** व्योमकेश (पुं.) भव (पुं.) भीम (पुं.) स्थाणु (पुं.) रुद्र (पुं.) उमापति (पुं.) अहिर्बुध्न्य (पुं.) अष्टमूर्ति (पुं.) गजारि (पुं.) महानट (पुं.)

**कपर्दोऽस्य जटाजूटः पिनाकोऽजगवं धनुः।**
**प्रमथाः स्युः पारिषदाः ब्राह्मीत्याद्यास्तु मातरः ॥४२॥**

कपर्दः अस्य जटा-जूटः पिनाकः अज-गवम् धनुः।
प्रमथाः स्युः पारिषदाः ब्राह्मी इत्याद्या अस्तु मातरः ॥

**शिवजटा -** कपर्द (पुं.) जटाजूट (पुं.) **शिवधनुः -** पिनाक (पुं.) अजगव (नपुं.)

**शिवानुचरः -** प्रमथ (पुं.) पारिषद (पुं.)

**ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।**
**वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः॥४३॥**

ब्राह्मी माहेश्वरी च एव कौमारी वैष्णवी तथा॥
वाराही च तथा इन्द्राणी चामुण्डा सप्त मातरः॥

**शक्तिदेवता -** ब्राह्मी (स्त्री.) माहेश्वरी (स्त्री.) कौमारी (स्त्री.) वैष्णवी (स्त्री.) वाराही (स्त्री.) इन्द्राणी (स्त्री.) चामुण्डा (स्त्री.)

**विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा।**
**अणिमा महिमा चैव गरिमा लघिमा तथा॥४४॥**

विभूतिः भूतिः ऐश्वर्यम् अणिमा आदिकम् अष्टधा।
अणिमा महिमा च एव गरिमा लघिमा तथा॥

**अणुताद्यष्टविधप्रभावः -** विभूति (स्त्री.) भूति (स्त्री.) ऐश्वर्य (नपुं.)
**सिद्धिः -** अणिमन् (पुं.) महिमन् (पुं.) गरिमन् (पुं.) लघिमन् (पुं.)

**प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्ट सिद्धयः।**
**उमा कात्यायनी गौरी काली हैमवतीश्वरी ॥४५॥**

प्राप्तिः प्राकाम्यम् ईशित्वम् वशित्वम् च अष्ट सिद्धयः।
उमा कात्यायनी गौरी काली हैमवती ईश्वरी ॥

**सिद्धिः -** प्राप्ति (स्त्री.) प्राकाम्य (नपुं.) ईशित्व (नपुं.) वशित्व (नपुं.)
**पार्वती -** उमा (स्त्री.) कात्यायनी (स्त्री.) गौरी (स्त्री.) काली (स्त्री.) हैमवती (स्त्री.) ईश्वरी (स्त्री.)

**शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला।**
**अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका ॥४६॥**

शिवा भवानी रुद्राणी शर्वाणी सर्व-मङ्गला।
अपर्णा पार्वती दुर्गा मृडानी चण्डिका आम्बिका ॥

**पार्वती -** शिवा (स्त्री.) भवानी (स्त्री.) रुद्राणी (स्त्री.) शर्वाणी (स्त्री.) सर्वमङ्गला (स्त्री.) अपर्णा (स्त्री.) पार्वती (स्त्री.) दुर्गा (स्त्री.) मृडानी (स्त्री.) चण्डिका (स्त्री.) अम्बिका (स्त्री.)

**आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा।**
**विनायको विघ्नराजद्वैमातुरगणाधिपाः॥४७॥**

आर्या दाक्षायणी च एव गिरिजा मेनका-आत्मजा।

विनायकः विघ्न-राज-द्वै-मातुर-गण-अधिपाः॥

**पार्वती -** आर्या (स्त्री.) दाक्षायणी (स्त्री.) गिरिजा (स्त्री.) मेनकात्मजा (स्त्री.)

**गणेशः -** विनायक (पुं.) विघ्नराज (पुं.) द्वैमातुर (पुं.) गणाधिप (पुं.)

**अप्येकदन्तहेरम्बलम्बोदरगजाननाः।**

**कार्तिकेयो महासेनः शरजन्मा षडाननः॥४८॥**

अपि एक-दन्त-हेरम्ब-लम्ब-उदर-गज-आननाः।

कार्तिकेयः महा-सेनः शर-जन्मा षड्-आननः॥

**गणेशः -** एकदन्त (पुं.) हेरम्ब (पुं.) लम्बोदर (पुं.) गजानन (पुं.)

**कार्तिकेयः -** कार्तिकेय (पुं.) महासेन (पुं.) शरजन्मन् (पुं.) षडानन (पुं.)

**पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ।**

**बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः॥४९॥**

पार्वती-नन्दनः स्कन्दः सेनानीः अग्नि-भूः गुहः ।

बाहुलेयः तारकजित् विशाखः शिखि-वाहनः॥

**कार्तिकेयः -** पार्वतीनन्दन (पुं.) स्कन्द (पुं.) सेनानी (पुं.) अग्निभू (पुं.) गुह (पुं.) बाहुलेय (पुं.) तारकजित् (पुं.) विशाख (पुं.) शिखिवाहन (पुं.)

**षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ।**

**शृङ्गी भृङ्गी रिटिस्तुण्डी नन्दिको नन्दिकेश्वरः॥५०॥**

षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ।

शृङ्गी भृङ्गी रिटिस्तुण्डी नन्दिको नन्दिकेश्वरः॥

**कार्तिकेयः -** षाण्मातुर (पुं.) शक्तिधर (पुं.) कुमार (पुं.) क्रौञ्चदारण (पुं.)

**नन्दिः -** शृङ्गिन् (पुं.) भृङ्गिन् (पुं.) रिटि (पुं.) तुण्डिन् (पुं.) नन्दिक (पुं.) नन्दिकेश्वर (पुं.)

**कर्मकोटी तु चामुण्डा चर्ममुण्डा तु चर्चिका।**

**इन्द्रो मरुत्वान्मघवा बिडौजाः पाकशासनः॥५१॥**

कर्म-कोटी तु चामुण्डा चर्म-मुण्डा तु चर्चिका।

इन्द्रः मरुत्वान् मघवा बिडौजाः पाक-शासनः॥

**चर्ममुण्डा -** कर्ममोटी (स्त्री.) चामुण्डा (स्त्री.) चर्ममुण्डा (स्त्री.) चर्चिका (स्त्री.)

**इन्द्रः -** इन्द्र (पुं.) मरुत्वत् (पुं.) मघवन् (पुं.) बिडौजस् (पुं.) पाकशासन (पुं.)

**वृद्धश्रवाः सुनासीरः पुरुहूतः पुरन्दरः।**
**जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः॥५२॥**

वृद्ध-श्रवाः सुनासीरः पुरुहूतः पुरन्दरः।
जिष्णुः लेख-ऋषभः शक्रः शतमन्युः दिवस्पतिः॥

**इन्द्रः -** वृद्धश्रवस् (पुं.) सुनासीर (पुं.) पुरुहूत (पुं.) पुरन्दर (पुं.) जिष्णु (पुं.) लेखर्षभ (पुं.) शक्र (पुं.) शतमन्यु (पुं.) दिवस्पति (पुं.)

**सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा।**
**वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः॥५३॥**

सुत्रामा गोत्रभिद् वज्री वासवः वृत्रहा वृषा ॥
वास्तोष्पतिः सुरपतिः बल-आरातिः शची-पतिः।

**इन्द्रः -** सुत्रामन् (पुं.) गोत्रभिद् (पुं.) वज्रिन् (पुं.) वासव (पुं.) वृत्रहन् (पुं.) वृषन् (पुं.) वास्तोष्पति (पुं.) सुरपति (पुं.) बलाराति (पुं.) शचीपति (पुं.)

**जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः।**
**सङ्क्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः॥५४॥**

जम्भभेदी हरि-हयः स्वाराज् नमुचि-सूदनः।
सङ्क्रन्दनः दुश्च्यवनः तुराषाट् मेघ-वाहनः॥

**इन्द्रः -** जम्भभेदिन् (पुं.) हरिहय (पुं.) स्वाराज् (पुं.) नमुचिसूदन (पुं.) सङ्क्रन्दन (पुं.) दुश्च्यवन (पुं.) तुराषा (पुं.) मेघवाहन (पुं.)

**आखण्डलः सहस्राक्ष ऋभुक्षास्तस्य तु प्रिया।**
**पुलोमजा शचीन्द्राणी नगरी त्वमरावती॥५५॥**

आखण्डलः सहस्राक्षः ऋभुक्षाः तस्य तु प्रिया।
पुलोमजा शची इन्द्राणी नगरी तु अमरावती॥

**इन्द्रः -** आखण्डल (पुं.) सहस्राक्ष (पुं.) ऋभुक्षिन् (पुं.)

**शची -** पुलोमजा (स्त्री.) शची (स्त्री.) इन्द्राणी (स्त्री.) **इन्द्रपुरः -** अमरावती (स्त्री.)

**हय उच्चैःश्रवाः सूतो मातलिर्नन्दनं वनम्।**
**स्यात्प्रासादो वैजयन्तो जयन्तः पाकशासनिः॥५६॥**

हय ःउच्चैः-श्रवाः सूतः मातलिः नन्दनम् वनम्।
स्यात् प्रासादः वैजयन्तः जयन्तः पाक-शासनिः।

**इन्द्राश्वः -** उच्चैःश्रवस् (पुं.) **इन्द्रसारथिः -** मातलि (पुं.) **इन्द्रवनम् -** नन्दन (नपुं.)
**इन्द्रगृहम् -** वैजयन्त (पुं.) **जयन्तः -** जयन्त (पुं.) पाकशासनि (पुं.)

**ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः।**
**ह्रादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः॥५७॥**

ऐरावतः अभ्रमातङ्ग-ऐरावण-अभ्रमु-वल्लभाः।
ह्रादिनी वज्र-मस्त्री स्यात् कुलिशम् भिदुरम् पविः।

**इन्द्रहस्तिः -** ऐरावत (पुं.) अभ्रमातङ्ग (पुं.) ऐरावण (पुं.) अभ्रमुवल्लभ (पुं.)
**इन्द्रवज्रायुधम् -** ह्रादिनी (स्त्री.) वज्र (पुं./नपुं.) कुलिश (पुं./नपुं.) भिदुर (नपुं.) पवि (पुं.)

**शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः।**
**व्योमयानं विमानोऽस्त्री नारदाद्याः सुरर्षयः॥५८॥**

शत-कोटिः स्वरुः शम्बः दम्भोलिः अशनिः द्वयोः।
व्योम-यानम् विमानः अस्त्री नारद-आद्याः सुर-ऋयः॥

**इन्द्रवज्रायुधम् -** शतकोटि (पुं.) स्वरु (पुं.) शम्ब (पुं.) दम्भोलि (पुं.) अशनि (पुं./स्त्री.)
**देवरथः -** व्योमयान (नपुं.) विमान (पुं./नपुं.) **देवर्षिः -** नारद (पुं.)

**स्यात्सुधर्मा देवसभा पीयूषममृतं सुधा।**
**मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका॥५९॥**

स्यात् सुधर्मा देव-सभा पीयूषम् अमृतम् सुधा।
मन्दाकिनी वियद्-गङ्गा स्वर्-नदी सुर-दीर्घिका॥

**देवसभा -** सुधर्मा (स्त्री.) देवसभा (स्त्री.) **अमृतम् -** पीयूष (नपुं.) अमृत (नपुं.) सुधा (स्त्री.)
**देवगङ्गा -** मन्दाकिनी (स्त्री.) वियद्गङ्गा (स्त्री.) स्वर्णदी (स्त्री.) सुरदीर्घिका (स्त्री.)

**मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः।**
**पञ्चैते देवतरवो मन्दारः पारिजातकः॥६०॥**

मेरुः सुमेरुः हेमाद्री रत्न-सानुः सुर-आलयः।

पञ्च एते देव-तरवः मन्दारः पारिजातकः॥

**मेरुपर्वतः** मेरु (पुं.) सुमेरु (पुं.) हेमाद्रि (पुं.) रत्नसानु (पुं.) सुरालय (पुं.)

**देववृक्षः -** देवतरु (पुं.) मन्दार (पुं.) पारिजातक (पुं.)

**सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्।**

**सनत्कुमारो वैधात्रः स्वर्वैद्यावश्विनीसुतौ॥६१॥**

सन्तानः कल्प-वृक्षः च पुंसि वा हरि-चन्दनम्।

सनत्-कुमारः वैधात्रः स्वर्-वैद्य-अश्विनी-सुतौ॥

**देववृक्षः -** सन्तान (पुं.) कल्पवृक्ष (पुं.) हरिचन्दन (पुं./नपुं.)

**सनत्कुमारः -** सनत्कुमार (पुं.) वैधात्र (पुं.) **अश्विनीकुमारौ -** स्वर्वैद्य (पुं.) अश्विनीसुत (पुं.)

**नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ।**

**स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः॥६२॥**

नासत्यौ अश्विनौ दस्रौ आश्विनेयौ च तौ उभौ।

स्त्रियाम् बहुषु अप्सरसः स्वर्-वेश्या उर्वशी-मुखाः॥

**अश्विनीकुमारौ -** नासत्यौ (पुं.,नित्यद्वि.) अश्विनौ (पुं.,नित्यद्वि.) दस्रौ (पुं.,नित्यद्वि.) आश्विनेयौ (पुं.,नित्यद्वि.)

**अप्सरस् -** अप्सरस् (स्त्रीलिङ्गः,नित्यबहुवचनान्तः) स्वर्वेश्या (स्त्री.)

**घृताची मेनका रम्भा उर्वशी च तिलोत्तमा।**

**सुकेशीमञ्जुघोषाद्याः कथ्यन्तेऽप्सरसो बुधैः ॥६३॥**

घृताची मेनका रम्भा उर्वशी च तिलोत्तमा।

सुकेशी-मञ्जु-घोषा-आद्याः कथ्यन्ते अप्सरसः बुधैः ॥

**घृताचीनामा अप्सरा -** घृताची (स्त्री.) **मेनकानामा अप्सरा -** मेनका (स्त्री.)

**रम्भानामा अप्सरा -** रम्भा (स्त्री.) **उर्वशीनामा अप्सरा -** उर्वशी (स्त्री.)

**तिलोत्तमानामा अप्सरा -** तिलोत्तमा (स्त्री.) **सुकेशीनामा अप्सरा -** सुकेशी (स्त्री.)

**मञ्जुघोषानामा अप्सरा -** मञ्जुघोषा (स्त्री.)

**हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम्।**
**अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः॥६४॥**

हाहा हूहूः च एवम् आद्याः गन्धर्व-अस्त्रि-दिवौकसाम्।
अग्निः वैश्वानरः वह्निः वीति-होत्रः धनञ्जयः॥

**हाहानामदेवगायकः -** हाहा (पुं.) **हूहूनामदेवगायकः -** हूहू (पुं.) **देवगायकः -** गन्धर्व (पुं.)
**अग्निः -** अग्नि (पुं.) वैश्वानर (पुं.) वह्नि (पुं.) वीतिहोत्र (पुं.) धनञ्जय (पुं.)

**कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात्।**
**बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः॥६५॥**

कृपीट-योनिः ज्वलनः जातवेदाः तनूनपात्।
बर्हिः शुष्मा कृष्ण-वर्त्मा शोचिष्केशः उषर्बुधः॥

**अग्निः -** कृपीटयोनि (पुं.) ज्वलन (पुं.) जातवेदस् (पुं.) तनूनपात् (पुं.) बर्हि (पुं.) शुष्मन् (पुं.) कृष्णवर्त्मन् (पुं.) शोचिष्केश (पुं.) उषर्बुध (पुं.)

**आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः।**
**लोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः॥६६॥**

आश्रयाशः बृहद्-भानुः कृशानुः पावकः अनलः।
लोहिताश्वः वायु-सखः शिखावान् आशुशुक्षणिः॥

**अग्निः -** आश्रयाश (पुं.) बृहद्भानु (पुं.) कृशानु (पुं.) पावक (पुं.) अनल (पुं.) रोहिताश्व (पुं.) वायुसख (पुं.) शिखावत् (पुं.) आशुशुक्षणि (पुं.)

**हिरण्यरेता हुतभुग्दहनो हव्यवाहनः।**
**सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः॥६७॥**

हिरण्यरेता हुतभुग्-दहनः हव्य-वाहनः।
सप्तार्चिः दमुनाः शुक्रः चित्रभानुः विभावसुः॥

**अग्निः -** हिरण्यरेतस् (पुं.) हुतभुज् (पुं.) दहन (पुं.) हव्यवाहन (पुं.) सप्तार्चिस् (पुं.) दमुनस् (पुं.) शुक्र (पुं.) चित्रभानु (पुं.) विभावसु (पुं.)

**शुचिरप्पित्तमौर्वस्तु बाडवो वडवानलः।**
**वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम्॥६८॥**

शुचिः अप्पित्तम् और्वः तु बाडवः वडवानलः।
वह्नेः द्वयोः ज्वाल-कीला-अर्चिस्-हेतिः शिखा स्त्रियाम्॥

**अग्निः -** शुचि (पुं.) अप्पित्त (नपुं.) **बडवाग्निः -** और्व (पुं.) वाडव (पुं.) वडवानल (पुं.)
**अग्निज्वाला -**ज्वाला (पुं./स्त्री.) कीला (पुं./स्त्री.) अर्चिस् (स्त्री.) हेति (स्त्री.) शिखा (स्त्री.)

**त्रिषु स्फुलिङ्गोऽग्निकणः सन्तापः सञ्ज्वरः समौ।**
**उल्का स्यान्निर्गतज्वाला भूतिर्भसितभस्मनी॥६९॥**

त्रिषु स्फुलिङ्गः अग्नि-कणः सन्तापः सञ्ज्वरः समौ।
उल्का स्यात् निर्गत-ज्वाला भूतिः भसित-भस्मनी॥

**अग्निकणः -** स्फुलिङ्ग (पुं./स्त्री./नपुं.) अग्निकण (पुं.) **अग्नितापः -** सन्ताप (पुं.) सञ्ज्वर (पुं.)
**अग्नेः ज्वाला -** उल्का (स्त्री.) निर्गतज्वाला (पुं./स्त्री.) **भस्मन् -** भूति (स्त्री.) भसित (नपुं.) भस्मन् (नपुं.)

**क्षारो रक्षा च दावस्तु दवो वनहुताशनः।**
**धर्मराजः पितृपतिः समवर्ती परेतराट्॥७०॥**

क्षारः रक्षा च दावः तु दवः वन-हुताशनः।
धर्मराजः पितृ-पतिः समवर्ती परेतराट्॥

**भस्मन् -** क्षार (पुं.) रक्षा (स्त्री.) **वनवह्निः -** दाव (पुं.) दव (पुं.) वनहुताशन (पुं.)
**यमः -** धर्मराज (पुं.) पितृपति (पुं.) समवर्तिन् (पुं.) परेतराज् (पुं.)

**कृतान्तो यमुनाभ्राता शमनो यमराड्यमः।**
**कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः॥७१॥**

कृतान्तः यमुना-भ्राता शमनः यमराज् यमः।
कालः दण्ड-धरः श्राद्ध-देवः वैवस्वतः अन्तकः॥

**यमः -** कृतान्त (पुं.) यमुनाभ्रातृ (पुं.) शमन (पुं.) यमराज् (पुं.) यम (पुं.) काल (पुं.) दण्डधर (पुं.) श्राद्धदेव (पुं.) वैवस्वत (पुं.) अन्तक (पुं.)

**राक्षसः कौणपः क्रव्यात्क्रव्यादोऽस्रप आशरः।**
**रात्रिञ्चरो रात्रिचरः कर्बुरो निकषात्मजः॥७२॥**

राक्षसः कौणपः क्रव्यात् क्रव्यादः अस्रपः आशरः।

रात्रिञ्चरः रात्रिचरः कर्बुरः निकषात्मजः॥

**राक्षसः -** राक्षस (पुं.) कौणप (पुं.) क्रव्याद् (पुं.) क्रव्याद (पुं.) अस्रप (पुं.) आशर (पुं.) रात्रिञ्चर (पुं.) रात्रिचर (पुं.) कर्बुर (पुं.) निकषात्मज (पुं.)

**यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी।**
**प्रचेता वरुणः पाशी यादसाम्पतिरप्पतिः॥७३॥**

यातुधानः पुण्यजनः नैर्ऋतः यातु-रक्षसी।

प्रचेता वरुणः पाशी यादसाम्पतिः अप्पतिः॥

**राक्षसः -** यातुधान (पुं.) पुण्यजन (पुं.) नैरृत (पुं.) यातु (नपुं.) रक्षस् (पुं.)

**वरुणः -** प्रचेतस् (पुं.) वरुण (पुं.) पाशिन् (पुं.) यादसाम्पति (पुं.) अप्पति (पुं.)

**श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः।**
**पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः॥७४॥**

श्वसनः स्पर्शनः वायुः मातरिश्वा सदा-गतिः।

पृषदश्वः गन्धवहः गन्धवाह-अनिल-आशुगाः॥

**वायुः -** श्वसन (पुं.) स्पर्शन (पुं.) वायु (पुं.) मातरिश्वन् (पुं.) सदागति (पुं.) पृषदश्व (पुं.) गन्धवह (पुं.) गन्धवाह (पुं.) अनिल (पुं.) आशुग (पुं.)

**समीरमारुतमरुज्जगत्प्राणसमीरणाः।**
**नभस्वद्वातपवनपवमानप्रभञ्जनाः॥७५॥**

समीर-मारुत-मरुत्-जगत्प्राण-समीरणाः।

नभस्वत्-वात-पवन-पवमान-प्रभञ्जनाः॥

**वायुः -** समीर (पुं.) मारुत (पुं.) मरुत् (पुं.) जगत्प्राण (पुं.) समीरण (पुं.) नभस्वत् (पुं.) वात (पुं.) पवन (पुं.) पवमान (पुं.) प्रभञ्जन (पुं.)

**प्रकम्पनो महावातो झञ्झावातः सवृष्टिकः।**

**प्राणोऽपानः समानश्चोदानव्यानौ च वायवः[1]॥७६॥**

प्रकम्पनः महावातः झञ्झावातः सवृष्टिकः।

प्राणः अपानः समानः च उदान-व्यानौ च वायवः॥

**महावायुः -** प्रकम्पन (पुं.) महावात (पुं.) **सवृष्टिकवायुः -** झञ्झावात (पुं.)

**शरीरवायुः -** प्राण (पुं.) अपान (पुं.) समान (पुं.) उदान (पुं.) व्यान (पुं.)

**शरीरस्था इमे रंहस्तरसी तु रयः स्यदः।**

**जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम्॥७७॥**

शरीरस्थाः इमे रंहस्-तरसी तु रयः स्यदः।

जवः अथ शीघ्रम् त्वरितम् लघु क्षिप्रमरम् द्रुतम्॥

**वेगः -** रंहस् (नपुं.) तरस् (नपुं.) रय (पुं.) स्यद (पुं.) जव (पुं.)

**शीघ्रम् -** शीघ्र (नपुं.) त्वरित (नपुं.) लघु (नपुं.) क्षिप्र (नपुं.) अर (नपुं.) द्रुत (नपुं.)

**सत्वरं चपलं तूर्णमविलम्बितमाशु च।**

**सततानारताऽश्रान्तसन्तताविरतानिशम्॥७८॥**

सत्वरम् चपलम् तूर्णम् अविलम्बितम् आशु च।

सतत-अनारत-अश्रान्त-सन्तत-अविरत-अनिशम्॥

**शीघ्रम् -** सत्वर (नपुं.) चपल (नपुं.) तूर्ण (नपुं.) अविलम्बित (नपुं.) आशु (नपुं.)

**अविरतम् -** सतत (नपुं.) अनारत (नपुं.) अश्रान्त (नपुं.) सन्तत (नपुं.) अविरत (नपुं.) अनिश (नपुं.)

**नित्यानवरताजस्रमप्यथातिशयो भरः।**

**अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम्॥७९॥**

नित्य-अनवरत-अजस्रम् अथ अतिशयः भरः।

अतिवेल-भृश-अत्यर्थ-अतिमात्र-उद्गाढ-निर्भरम्॥

**अविरतम् -** नित्य (नपुं.) अनवरत (नपुं.) अजस्र (नपुं.)

---

1 हृदि प्राणो गुदोऽपानः समानो नाभिमण्डले।
उदानः कण्ठदेशे स्याद्व्यानः सर्वशरीरगः॥
अन्नप्रवेशनं मूत्राद्युत्सर्गोऽन्नविपाचनम्।
भाषणादि निमेषादि तद्व्यापाराः क्रमादमी॥

**अतिशयः -** अतिशय (पुं.) भर (पुं.) अतिवेल (नपुं.) भृश (नपुं.) अत्यर्थ (नपुं.) अतिमात्र (नपुं.) उद्गाढ (नपुं.) निर्भर (नपुं.)

**तीव्रैकान्तनितान्तानि गाढबाढदृढानि च।**
**क्लीबे शीघ्राद्यसत्त्वे स्यात्त्रिष्वेषां सत्त्वगामि यत्॥८०॥**

तीव्र-एकान्त-नितान्तानि गाढ-बाढ-दृढानि च।
क्लीबे शीघ्रादि-असत्त्वे स्यात् त्रिषु एषाम् सत्त्वगामि यत्॥

**अतिशयः -** तीव्र (नपुं.) एकान्त (नपुं.) नितान्त (नपुं.) गाढ (नपुं.) बाढ (नपुं.) दृढ (नपुं.) =***{असत्वे}***

**अतिशयः -** तीव्र (पुं./स्त्री./नपुं.) एकान्त (पुं./स्त्री./नपुं.) नितान्त (पुं./स्त्री./नपुं.) गाढ (पुं./स्त्री./नपुं.) बाढ (पुं./स्त्री./नपुं.) दृढ (पुं./स्त्री./नपुं.) =***{सत्त्वगामि}***

**कुबेरस्त्र्यम्बकसखो यक्षराड्गुह्यकेश्वरः।**
**मनुष्यधर्मा धनदो राजराजो धनाधिपः॥८१॥**

कुबेरः त्र्यम्बक-सखः यक्षराज् गुह्यकेश्वरः।
मनुष्य-धर्मा धनदः राजराजः धनाधिपः॥

**कुबेरः -** कुबेर (पुं.) त्र्यम्बकसख (पुं.) यक्षराज् (पुं.) गुह्यकेश्वर (पुं.) मनुष्यधर्मन् (पुं.) धनद (पुं.) राजराज (पुं.) धनाधिप (पुं.)

**किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः।**
**यक्षैकपिङ्गैलविलश्रीदपुण्यजनेश्वराः॥८२॥**

किन्नर-ईशः वैश्रवणः पौलस्त्यः नर-वाहनः।
यक्ष-एकपिङ्ग-ऐलविल-श्रीद-पुण्य-जनेश्वराः॥

**कुबेरः -** किन्नरेश (पुं.) वैश्रवण (पुं.) पौलस्त्य (पुं.) नरवाहन (पुं.) यक्ष (पुं.) एकपिङ्ग (पुं.) ऐलविल (पुं.) श्रीद (पुं.) पुण्य (नपुं.) जनेश्वर (पुं.)

**अस्योद्यानं चैत्ररथम्पुत्रस्तु नलकूबरः।**
**कैलासः स्थानमलका पूर्विमानं तु पुष्पकम्॥८३॥**

अस्य उद्यानम् चैत्ररथम् पुत्रः तु नलकूबरः।
कैलासः स्थानम् अलका पूः विमानम् तु पुष्पकम्॥

**कुबेरस्योद्यानम् -** चैत्ररथ (नपुं.) **कुबेरपुत्रः -** नलकूबर (पुं.) **कुबेरस्थानम् -** कैलास (पुं.)
**कुबेरपुरी -** अलका (स्त्री.) **कुबेरविमानम् -** पुष्पक (पुं./नपुं.)

**स्यात्किन्नरः किम्पुरुषस्तुरङ्गवदनो मयुः।**
**निधिर्ना शेवधिर्भेदाः पद्मशङ्खादयो निधेः॥८४॥**

स्यात् किन्नरः किम्पुरुषः तुरङ्ग-वदनः मयुः।
निधिः ना शेवधिः भेदाः पद्म-शङ्ख-आदयः निधेः॥

**किन्नरः -** किन्नर (पुं.) किम्पुरुष (पुं.) तुरङ्गवदन (पुं.) मयु (पुं.)
**सामान्यनिधिः -** निधि (पुं.) शेवधि (पुं.)
**विशेषनिधिः -** पद्म (पुं./नपुं.) शङ्ख (पुं./नपुं.)

**महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ ।**
**मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव ॥८५॥**

महापद्मः च पद्मः शङ्खः मकर-कच्छपौ ।
मुकुन्द-कुन्द-नीलाः च खर्वः च निधयः नव ॥

**विशेषनिधिः -** महापद्म (पुं.) पद्म (पुं./नपुं.) शङ्ख (पुं./नपुं.) मकर (पुं.) कच्छप (पुं.) मुकुन्द (पुं.) कुन्द (पुं.) नील (पुं.) खर्व (पुं.)

*॥ इति अमरसिंहप्रणीते नामलिङ्गानुशासने प्रथमकाण्डे स्वर्गवर्गः॥*

==========================================

# श्रीमद्भगवद्गीता

## द्वादशोऽध्यायः

# भक्तियोगः

**प्रतिपाद्यविषय : (भक्तियोगः)**

द्वादशोऽध्यायः भक्तियोग इति ख्यातः । अस्मिन् अध्याये विंशतिः श्लोकाः प्राप्यन्ते । एकादशेऽध्याये भक्तिश्रेष्ठता ('मत्कर्मकृतमत्परमः') वर्णिता। 'मत्कर्मकृतमत्परमः' इति प्रेरणया एव अर्जुनः द्वादशोऽध्याये पृष्टवान् यत् कः भक्तः योगे श्रेष्ठः इति। ये भक्ताः भगवतः प्रसादेन सह स्नेहं प्राप्नुवन्ति। भगवान् श्रीकृष्णः अस्मिन् अध्याये तेषां वर्णनं करोति । भक्ते दृश्यमानानां भक्तिस्वरूपान् अतिरिच्य प्रायः ४० लक्षणानि अपि वर्णितानि सन्ति । एतान् भक्तिमार्गान् अनुसृत्य कश्चित् भक्तः एतान् भक्तिगुणान् विकसितुं शक्नोति ।

**सगुणनिर्गुणब्रह्मनिष्ठयोः मध्ये का श्रेष्ठा का च कर्तव्या इति अर्जुनस्य प्रश्नः -**

**अर्जुन उवाच**

**एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।**
**ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः॥१॥**

एवम् सतत-युक्ताः ये भक्ताः त्वाम् पर्युपासते ।
ये च अपि अक्षरम् अव्यक्तम् तेषाम् के योग-वित्तमाः ॥

**सगुणब्रह्मनिष्ठायाः सुकरत्वात्सौलभ्यं प्राशस्त्यं च -**

**श्रीभगवानुवाच**

**मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।**
**श्रद्धया परयोपेतास्ते मे युक्ततमा मताः॥२॥**

मयि आवेश्य मनः ये माम् नित्य-युक्ताः उपासते।
श्रद्धया परया उपेताः ते मे युक्ततमाः मताः॥

**निर्गुणब्रह्मनिष्ठायाः दुष्करत्वाद् दौर्लभ्यं श्रेष्ठत्वं च**

**ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।**
**सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्॥३॥**
ये तु अक्षरम् अनिर्देश्यम् अव्यक्तम् पर्युपासते।
सर्वत्रगम् अचिन्त्यम् च कूटस्थम् अचलम् ध्रुवम्॥

**सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।**
**ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः॥४॥**
सन्नियम्य इन्द्रिय-ग्रामम् सर्वत्र सम-बुद्धयः।
ते प्राप्नुवन्ति माम् एव सर्व-भूत-हिते रताः॥
**क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।**
**अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते॥५॥**
क्लेशः अधिकतरः तेषाम् अव्यक्त-असक्त-चेतसाम्।
अव्यक्ता हि गतिः दुःखम् देहवद्भिः अवाप्यते॥

**सगुणब्रह्मोपासकानाम् अविलम्बेन मोक्षसिद्धिः**

**ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः।**
**अनन्येनैव योगेन मां ध्यायन्त उपासते॥६॥**
ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः।
अनन्येन एव योगेन माम् ध्यायन्तः उपासते ॥

**सगुणनिर्गुणोपासनायाः सुकरं शीघ्रफलप्रदं च उपायचतुष्टयं भगवतः भक्तप्रेमातिरेकः च**

**तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।**
**भवामि नचिरात्पार्थ मय्यावेशितचेतसाम्॥७॥**
तेषाम् अहम् समुद्धर्ता मृत्यु-संसार-सागरात्।
भवामि न चिरात् पार्थ मयि आवेशित-चेतसाम् ॥

**विश्वरूपध्यानलक्षणे भक्तियोगेऽर्जुनं प्रति भगवत्प्रवर्तनम् -**

**मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।**
**निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः॥८॥**
मयि एव मनः आधत्स्व मयि बुद्धिम् निवेशय।
निवसिष्यसि मयि एव अत ऊर्ध्वम् न संशयः ॥

**भक्तियोगे परिनिष्ठितस्याभ्यासयोगादिसाधनकथनम्**

**अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्।**
**अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय॥९॥**
अथ चित्तम् समाधातुम् न शक्नोषि मयि स्थिरम्।
अभ्यास-योगेन ततः माम् इच्छ आप्तुम् धनञ्जय ॥

**अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव।**
**मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि॥१०॥**
अभ्यासे अपि असमर्थः असि मत्-कर्म-परमः भव।
मत्-अर्थम् अपि कर्माणि कुर्वन् सिद्धिम् अवाप्स्यसि ॥
**अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः।**
**सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्॥११॥**
अथ एतत् अपि अशक्तः असि कर्तुम् मत्-योगम् आश्रितः।
सर्व-कर्म-फल-त्यागम् ततः कुरु यत-आत्मवान् ॥

**सर्वकर्मफलत्यागस्य स्तुतिः**

**श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते।**
**ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्॥१२॥**
श्रेयः हि ज्ञानम् अभ्यासात् ज्ञानात् ध्यानम् विशिष्यते।
ध्यानात् कर्म-फल-त्यागः त्यागात् शान्तिः अनन्तरम् ॥

**धर्म्यामृतम् -अर्थात्तद्विष्णोः परमं पदम् अभीप्सूनां कृते भगवता उक्ताः जीवन्मुक्तधर्माः -**

**अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।**
**निर्ममो निरहङ्कारः समदुःखसुखः क्षमी॥१३॥**
अद्वेष्टा सर्व-भूतानाम् मैत्रः करुण एव च।
निर्ममः निरहङ्कारः सम-दुःख-सुखः क्षमी ॥

**सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।**
**मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥१४॥**
सन्तुष्टः सततम् योगी यतात्मा दृढ-निश्चयः।
मयि अर्पित-मनः-बुद्धिः यः मत्-भक्तः सः मे प्रियः ॥

**यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।**
**हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः॥१५॥**
यस्मात् न उद्विजते लोकः लोकात् न उद्विजते च यः।
हर्ष-अमर्ष-भय-उद्वेगैः मुक्तः यः सः च मे प्रियः॥

**अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।**
**सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः॥१६॥**
अनपेक्षः शुचिः दक्षः उदासीनः गत-व्यथः।
सर्वारम्भ-परित्यागी यः मत्-भक्तः सः मे प्रियः ॥
**यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।**
**शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥१७॥**
यः न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभ-अशुभ-परित्यागी भक्तिमान् यः सः मे प्रियः ॥

**समः शत्रौ च मित्रे च तथा मानापमानयोः।**
**शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः॥१८॥**
समः शत्रौ च मित्रे च तथा मान-अपमानयोः।
शीत-उष्ण-सुख-दुःखेषु समः सङ्ग-विवर्जितः ॥

**तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।**
**अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः॥१९॥**
तुल्य-निन्दा स्तुतिः मौनी सन्तुष्टः येन केनचित्।
अनिकेतः स्थिर-मतिः भक्तिमान् मे प्रियः नरः ॥

**धर्म्यामृतानुष्ठानस्य फलश्रुतिः। यथोक्तधर्मपराणां स्वप्रीतिविषयत्वकथनम्**
**ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते।**
**श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः॥२०॥**
ये तु धर्म्य-अमृतम् इदम् यथा-उक्तम् पर्युपासते।
श्रद्दधाना मत्-परमाः भक्ताः ते अतीव मे प्रियाः ॥

**ॐतत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां**
**योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोऽध्यायः।**

====================

# ॥ सुभाषितानि ॥

**भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती।**
**तत्रापि काव्यं मधुरं तस्मादपि सुभाषितम् ॥**

**वागीशाद्याः सुमनसस्सर्वार्थानामुपक्रमे ।**
**यं नत्त्वा कृतकृत्यास्स्युस्तं नमामि गजाननम् ॥०१॥**
वागीश-आद्याः सुमनसः सर्व-अर्थानाम् उपक्रमे ।
यम् नत्वा कृत-कृत्याः स्युः तम् नमामि गजाननम् ॥

**शारदा शारदाम्भोजवदना वदनाम्बुजे ।**
**सर्वदा सर्वदास्माकं सन्निधिं सन्निधिं क्रियात् ॥०२॥**
शारदा शारद-अम्भोज-वदना वदन-अम्बुजे ।
सर्वदा सर्वदा अस्माकम् सन्निधिम् सन्निधिम् क्रियात् ॥

**तद्दिव्यमव्ययं धाम सारस्वतमुपास्महे ।**
**यत्प्रसादात्प्रलीयन्ते मोहान्धतमसच्छटाः ॥ ०३॥**
तद् दिव्यम् अव्ययम् धाम सारस्वतम् उपास्महे ।
यत् प्रसादात् प्रलीयन्ते मोह-अन्ध-तमस-छटाः ॥

**रोहणं सूक्तिरत्नानां वन्दे वृन्दं विपश्चिताम् ।**
**यन्मध्यपतितो नीचः काचोऽप्युच्चैर्महीयते ॥०४॥**
रोहणम् सूक्ति-रत्नानाम् वन्दे वृन्दम् विपश्चिताम् ।
यत् मध्य-पतितः नीचः काचः अपि उच्चैः महीयते ॥

**अञ्जलिस्थानि पुष्पाणि वासयन्ति करद्वयम् ।**
**अहो सुमनसां वृत्तिर्वामदक्षिणयोः समा ॥ ०५ ॥**
अञ्जलि-स्थानि पुष्पाणि वासयन्ति कर-द्वयम् ।
अहो सु-मनसाम् वृत्तिः वाम-दक्षिणयोः समा ॥

**यथा चित्तं तथा वाचो यथा वाचस्तथा क्रियाः ।**
**चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥०६॥**
यथा चित्तम् तथा वाचः यथा वाचः तथा क्रियाः ।
चित्ते वाचि क्रियायाम् च साधूनाम् एक-रूपता ॥

**अपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम् ।**
**सदालोकहिते युक्ता रत्नदीपा इवोत्तमा ॥०७॥**
अपेक्षन्ते न च स्नेहम् न पात्रम् न दश-अन्तरम् ।
सदा-लोक-हिते युक्ता रत्न-दीपा इव उत्तमा ॥

**प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।**
**तस्मात् तदेव वक्तव्यं वचने का दरिद्रता॥०८॥**
प्रिय-वाक्य-प्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् तद्-एव वक्तव्यम् वचने का दरिद्रता॥

**सेवितव्यो महावृक्षः फलच्छायासमन्वितः।**
**यदि दैवात् फलं नास्ति छाया केन निवार्यते ॥ ०९॥**
सेवितव्यः महा-वृक्षः फल-छाया-समन्वितः।
यदि दैवात् फलम् न अस्ति छाया केन निवार्यते ॥

**अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम्।**
**अयोग्यः पुरुषः नास्ति योजकस्तत्र दुर्लभः॥१०॥**
अ-मन्त्रम् अक्षरम् न अस्ति न अस्ति मूलम् अनौषधम्।
अयोग्यः पुरुषः न अस्ति योजकः तत्र दुर्लभः॥

**आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः ।**
**तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ॥११॥**
आचारः प्रथमः धर्मः इति एतद् विदुषाम् वचः ।
तस्माद् रक्षेत् सदाचारम् प्राणेभ्यः अपि विशेषतः ॥

**एकेन राजहंसेन या शोभा सरसो भवेत्।**
**न सा बकसहस्त्रेण परितस्तीरवासिना ॥ १२॥**
एकेन राज-हंसेन या शोभा सरसः भवेत्।
न सा बक-सहस्त्रेण परितः तीर-वासिना ॥

**वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।**
**अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः॥ १३ ॥**
वृत्तम् यत्नेन संरक्षेद् वित्तम् एति च याति च ।
अक्षीणः वित्ततः क्षीणः वृत्ततः तु हतः हतः॥

**श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।**
**आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥१४॥**
श्रूयताम् धर्म-सर्वस्वं श्रुत्वा च एव अवधार्यताम् ।
आत्मनः प्रति-कूलानि परेषाम् न समाचरेत् ॥

**गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा।**
**गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः॥१५॥**
गुणेषु एव हि कर्तव्यः प्रयत्नः पुरुषैः सदा।
गुण-युक्तः दरिद्रः अपि न ईश्वरैः अगुणैः समः॥

**द्वावेव पुरुषो लोके सूर्यमण्डलभेदिनी ।**
**परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः॥१६॥**
द्वौ एव पुरुषः लोके सूर्य-मण्डल-भेदिनी ।
परिव्राड्-योग-युक्तः च रणे च अभि-मुखः हतः॥

**सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्।**
**प्रियं च नानृतं ब्रूयात् एष धर्मः सनातनः॥१७॥**
सत्यम् ब्रूयात् प्रियम् ब्रूयात् न ब्रूयात् सत्यम् अप्रियम्।
प्रियम् च न अनृतम् ब्रूयात् एष धर्मः सनातनः॥

**सर्वदा व्यवहारे स्यात् औदार्यं सत्यता तथा।**
**ऋजुता मृदुता चापि कौटिल्यं न कदाचन ॥१८॥**
सर्वदा व्यवहारे स्यात् औदार्यम् सत्यता तथा।
ऋजुता मृदुता च अपि कौटिल्यम् न कदाचन ॥

**दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।**
**यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति॥१९॥**
दानम् भोगः नाशः तिस्रः गतयः भवन्ति वित्तस्य।
यः न ददाति न भुङ्क्ते तस्य तृतीया गतिः भवति॥

**न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः।**
**ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान्॥२०॥**
न हायनैः न पलितैः न वित्तेन न बन्धुभिः।
ऋषयः चक्रिरे धर्मम् यः अनूचानः सः नः महान्॥२०॥

**विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।**
**यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम्॥ २१॥**
विपदि धैर्यम् अथ अभ्युदये क्षमा सद् असि वाक्-पटुता युधि विक्रमः ।
यशसि च अभिरुचिः व्यसनं श्रुतौ प्रकृति-सिद्धम् इदम् हि महात्मनाम्॥

**गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः।**
**आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्य भवन्त्यपेयाः ॥ २२॥**
गुणाः गुण-ज्ञेषु गुणाः भवन्ति ते निर्गुणम् प्राप्य भवन्ति दोषाः।
आस्वाद्य-तोयाः प्रवहन्ति नद्यः समुद्रम् आसाद्य भवन्ति अपेयाः ॥

**पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।**
**नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ॥२३॥**
पिबन्ति नद्यः स्वयम् एव न अम्भः स्वयम् न खादन्ति फलानि वृक्षाः।
न अदन्ति सस्यम् खलु वारि-वाहाः परोपकाराय सताम् विभूतयः ॥

**साहित्यसङ्गीतकलाविहीनः साक्षात्पशुपुच्छविषाणहीनः ।**
**तृणं न खादन्नपि जीवमानः तद्भागधेयं परमं पशूनाम् ॥२४॥**
साहित्य-सङ्गीत-कला-विहीनः साक्षात् पशु-पुच्छ-विषाण-हीनः ।
तृणम् न खादन् अपि जीवमानः तद्-भाग-धेयं परमम् पशूनाम् ॥

**आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।**
**दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलु सज्जनानाम् ॥२५॥**
आरम्भ-गुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्ध-परार्द्ध-भिन्ना छाया इव मैत्री खलु सज्जनानाम् ॥

**यत्रापि कुत्रापि गता भवेयुः हंसा महीमण्डलमण्डनाय ।**
**हानिस्तु तेषां हि सरोवराणां येषां मरालैः सह विप्रयोगः॥२६॥**
यत्र अपि कुत्र अपि गताः भवेयुः हंसा मही-मण्डल-मण्डनाय ।
हानिः तु तेषाम् हि सरोवराणाम् येषाम् मरालैः सह विप्रयोगः॥

**भवन्ति नम्रास्तरवः फलोद्गमैः नवाम्बुभिर्दूरविलम्बिनो घनाः।**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ॥२७॥**
भवन्ति नम्राः तरवः फल-उद्गमैः नव-अम्बुभिः दूर-विलम्बिनः घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एव एष परोपकारिणाम् ॥

**अनेकशास्त्रं बहुवेदितव्यम् अल्पश्च कालो बहवश्च विघ्नाः।**
**यत्सारभूतं तदुपासितव्यं हंसो यथा क्षीरमिवाम्बुमध्यात् ॥ २८ ॥**
अनेक-शास्त्रम् बहु-वेदितव्यम् अल्पः च कालः बहवः च विघ्नाः।
यत् सार-भूतम् तद् उपासितव्यम् हंसः यथा क्षीरम् इव अम्बु-मध्यात् ॥

**गीर्भिर्गुरूणां परुषाक्षराभिस्तिरस्कृता यान्ति नरा महत्त्वम् ।**
**अलब्धशाणोत्कषणा नृपाणां न जातु मौलौ मणयो वसन्ति॥२९॥**
गीर्भिः गुरूणाम् परुष-अक्षराभिःतिरस्कृता यान्ति नराः महत्त्वम् ।
अ-लब्ध-शाण-उत्कषणाः नृपाणाम् न जातु मौलौ मणयः वसन्ति॥

**जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।**
**गुणाधिके पुंसि जनोऽनुरज्यते जनानुरागप्रभवा हि सम्पदः ॥३०॥**
जित-इन्द्रियत्वम् विनयस्य कारणम् गुण-प्रकर्षः विनयाद् अवाप्यते ।
गुण-अधिके पुंसि जनः अनुरज्यते जन-अनुराग-प्रभवाः हि सम्पदः ॥

**शास्त्रेषु निष्ठा सहजश्च बोधः प्रागल्भ्यमभ्यस्तगुणा च वाणी ।**
**कालानुरोधः प्रतिभानवत्वम् एते गुणाः कामदुघाः क्रियासु ॥३१॥**
शास्त्रेषु निष्ठा सहजः च बोधः प्रागल्भ्यम् अभ्यस्त-गुणा च वाणी ।
काल-अनुरोधः प्रतिभानवत्वम् एते गुणाः काम-दुघाः क्रियासु ॥

**जाड्यं धियो हरति सिञ्चति वाचि सत्यं**
**मानोन्नतिं दिशति पापमपाकरोति ।**
**चेतः प्रसादयति दिक्षु तनोति कीर्तिं**
**सत्सङ्गति कथय किं न करोति पुंसाम् ॥३२॥**

जाड्यम् धियः हरति सिञ्चति वाचि सत्यम्
मान-उन्नतिम् दिशति पापम् अपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिम्
सत्सङ्गति कथय किम् न करोति पुंसाम् ॥

**प्रारभ्यते न खलु विघ्नभयेन नीचैः**
**प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।**
**विघ्नैर्मुहुर्मुहुरपि प्रतिहन्यमानाः**
**प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥३३॥**

प्रारभ्यते न खलु विघ्न-भयेन नीचैः
प्रारभ्य विघ्न-विहता विरमन्ति मध्याः ।
विघ्नैः मुहुः मुहुः अपि प्रति-हन्यमानाः
प्रारब्धम् उत्तम-गुणाः न परित्यजन्ति ॥

**मनसि वचसि काये पुण्यपीयूषपूर्णा-**
**स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।**
**परगुणपरमाणून् पर्वतीकृत्य नित्यं**
**निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥३४॥**
मनसि वचसि काये पुण्य-पीयूष-पूर्णाः
त्रि-भुवनम् उपकार-श्रेणिभिः प्रीणयन्तः ।
पर-गुण-परमाणून् पर्वती-कृत्य नित्यं
निज-हृदि विकसन्तः सन्ति सन्तः कियन्तः ॥

**केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्वलाः**
**न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।**
**वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते**
**क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥३५॥**
केयूराणि न भूषयन्ति पुरुषम् हाराः न चन्द्र-उज्वलाः
न स्नानम् न विलेपनम् न कुसुमम् न अलङ्कृता मूर्धजाः ।
वाणी एका सम्-अलङ्करोति पुरुषम् या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततम् वाग्-भूषणम् भूषणम् ॥

**ये दीनेषु दयालवः स्पृशति यानल्पोऽपि न श्रीमदो**
**व्यग्रा ये च परोपकारकरणे हृष्यन्ति ये याचिताः ।**
**स्वस्थाः सन्ति च यौवनोन्मदमहाव्याधिप्रकोपेऽपि ये**
**तैः स्तम्भैरिव सुस्थितैः कलिभरक्लान्ता धरा धार्यते ॥३६॥**
ये दीनेषु दयालवः स्पृशति यान् अल्पः अपि न श्री-मदः
व्यग्राः ये च परोपकार-करणे हृष्यन्ति ये याचिताः ।
स्वस्थाः सन्ति च यौवन-उत्-मद-महा-व्याधि-प्रकोपे अपि ये
तैः स्तम्भैः इव सुस्थितैः कलि-भर-क्लान्ता धरा धार्यते ॥

**विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं**
**विद्याभोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।**
**विद्या बन्धुजनो विदेशगमने विद्या परा देवता**
**विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः ॥३७॥**

विद्या नाम नरस्य रूपम् अधिकम् प्रच्छन्न-गुप्तम् धनम्
विद्या-भोगकरी यशः-सुखकरी विद्या गुरूणाम् गुरुः ।
विद्या बन्धु-जनः विदेश-गमने विद्या परा देवता
विद्या राजसु पूज्यते न तु धनं विद्या-विहीनः पशुः ॥

**रे रे चातक! सावधानमनसा मित्र ! क्षणं श्रूयता-**
**मम्भोदा बहवो भवन्ति गगने सर्वेऽपि नैतादृशाः ।**
**केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,**
**यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः॥३८॥**

रे रे चातक ! सावधान-मनसा मित्र ! क्षणम् श्रूयताम्
अम्भोदाः बहवः भवन्ति गगने सर्वे अपि न एतादृशाः ।
केचिद् वृष्टिभिः आर्द्रयन्ति वसुधाम् गर्जन्ति केचिद् वृथा,
यम् यम् पश्यसि तस्य तस्य पुरतः मा ब्रूहि दीनं वचः॥

**यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो**
**यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।**
**आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्**
**सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥३९॥**

यावत् स्वस्थम् इदम् शरीरम् अरुजं यावज् जरा दूरतः
यावत् च इन्द्रिय-शक्तिः अप्रतिहता यावत् क्षयः न आयुषः ।
आत्म-श्रेयसि तावद् एव विदुषा कार्यः प्रयत्नः महान्
सन्दीप्ते भवने तु कूप-खननं प्रति-उद्यमः कीदृशः ॥

**भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं**
**माने दैन्यभयं बले रिपुभयं रूपे जराया भयम् ।**
**शास्त्रे वादभयं गुणे खलभयं काये कृतान्ताद्भयं**
**सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ॥४०॥**

भोगे रोग-भयम् कुले च्युति-भयम् वित्ते नृपालाद् भयम्
मानेे दैन्य-भयं बले रिपु-भयम् रूपे जराया भयम्।
शास्त्रे वाद-भयम् गुणे खल-भयम् काये कृत-अन्ताद् भयम्
सर्वम् वस्तु भय-अन्वितम् भुवि नृणाम् वैराग्यम् एव अभयम्॥

**सत्यं वक्तुमशेषमस्ति सुलभा वाणी मनोहारिणी**
**दातुं दानवरं शरण्यमभयं स्वच्छं पितृभ्यो जलम्।**
**पूजार्थं परमेश्वरस्य विमलः स्वाध्याययज्ञः परं**
**क्षुद्व्याधेः फलमूलमस्ति शमनं क्लेशात्मकैः किं धनैः॥ ४१॥**
सत्यं वक्तुम् अशेषम् अस्ति सुलभा वाणी मनोहारिणी
दातुम् दान-वरम् शरण्यम् अभयम् स्वच्छम् पितृभ्यः जलम्।
पूजार्थम् परम-ईश्वरस्य विमलः स्वाध्याय-यज्ञः परम्
क्षुद् व्याधेः फल-मूलम् अस्ति शमनम् क्लेश-आत्मकैः किम् धनैः॥

**केचिन्नाम वदन्तु कर्णसुखदं गीतं जगज्जीवनं**
**केषाञ्चिच्च मतेषु रूपमधिकं सौम्यं जगज्जीवनम्।**
**अस्माकं तु मते यतः सुखकरं गीतादि सञ्जायते**
**तत्प्रेमैव समर्पणाख्यमुचितं भावो जगज्जीवनम्॥४२॥**
केचित् नाम वदन्तु कर्ण-सुखदम् गीतम् जगत्-जीवनम्
केषाञ्चित् च मतेषु रूपम् अधिकम् सौम्यम् जगत् जीवनम्।
अस्माकम् तु मते यतः सुखकरम् गीता-आदि सञ्जायते
तत् प्रेम एव समर्पणाख्यम् उचितम् भावः जगत्-जीवनम्॥

**मित्रं स्वच्छतया रिपुं नयबलैर्लुब्धं धनैरीश्वरं**
**कार्येण द्विजमादरेण युवतिं प्रेम्णा शमैर्बान्धवान्।**
**अत्युग्रं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं**
**विद्याभी रसिकं रसेन सकलं शीलेन कुर्याद्वशम्॥४३॥**
मित्रम् स्वच्छतया रिपुम् नय-बलैः लुब्धम् धनैः ईश्वरम्
कार्येण द्विजम् आदरेण युवतिम् प्रेम्णा शमैः बान्धवान्।
अति-उग्रम् स्तुतिभिः गुरुम् प्रणतिभिः मूर्खम् कथाभिः बुधम्
विद्या-भी रसिकम् रसेन सकलं शीलेन कुर्याद् वशम्॥

**नागो भाति मदेन कं जलरुहैः पूर्णेन्दुना शर्वरी**
**शीलेन प्रमदा जवेन तुरगो नित्योत्सवैर्मन्दिरम् ।**
**वाणी व्याकरणेन हंसमिथुनैर्नद्यः सभा पण्डितैः**
**सत्पुत्रेण कुलं नृपेण वसुधा लोकत्रयं विष्णुना ॥४४॥**

नागः भाति मदेन कम् जलरुहैः पूर्ण-इन्दुना शर्वरी
शीलेन प्रमदा जवेन तुरगः नित्य-उत्सवैः मन्दिरम् ।
वाणी व्याकरणेन हंस-मिथुनैः नद्यः सभा पण्डितैः
सत्-पुत्रेण कुलम् नृपेण वसुधा लोक-त्रयं विष्णुना ॥

**मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा**
**धृष्टः पार्श्वे वसति च सदा दूरतश्चाप्रगल्भः ।**
**क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः**
**सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥४५॥**

मौनात् मूकः प्रवचन-पटुः वातुलः जल्पकः वा
धृष्टः पार्श्वे वसति च सदा दूरतः च अप्रगल्भः ।
क्षान्त्या भीरुः यदि न सहते प्रायशः न अभिजातः
सेवा-धर्मः परम-गहनः योगिनाम् अपि अगम्यः ॥

**क्वचित् पृथ्वीशय्यः क्वचिदपि च पर्यङ्कशयनः**
**क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः ।**
**क्वचित् कन्थाधारी क्वचिदपि च दिव्याम्बरधरो**
**मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥४६॥**

क्वचित् पृथ्वी-शय्यः क्वचिद् अपि च पर्यङ्क-शयनः
क्वचिद् शाकाहारः क्वचिद् अपि च शाल्योदन-रुचिः ।
क्वचित् कन्था-धारी क्वचिद् अपि च दिव्य-अम्बर-धरः
मनस्वी कार्य-अर्थी न गणयति दुःखम् न च सुखम् ॥

**प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः**
**प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।**
**पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं**
**रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥४७॥**

प्रिय-प्राया वृत्तिः विनय-मधुरः वाचि नियमः
प्रकृत्या कल्याणी मतिः अनव-गीतः परिचयः ।
पुरः वा पश्चाद् वा तद् इदम् अविपर्यासित-रसम्
रहस्यम् साधूनाम् अनुपधि विशुद्धम् विजयते ॥

**रथस्यैकं चक्रं भुजगयमिता सप्ततुरगा**
**निरालम्बो मार्गश्चरणविकलो सारथिरपि ।**
**रविर्यात्येवान्तं प्रतिदिनमपारस्य नभसः**
**क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥४८॥**

रथस्य एकम् चक्रम् भुजग-यमिता सप्त-तुरगा
निरालम्बः मार्गः चरण-विकलः सारथिः अपि ।
रविः याति एव अन्तं प्रतिदिनम् अपारस्य नभसः
क्रिया-सिद्धिः सत्त्वे भवति महताम् न उपकरणे ॥

**विद्यातीर्थे जगति विबुधाः साधवः सत्यतीर्थे**
**गङ्गातीर्थे मलिनमनसो योगिनो ध्यानतीर्थे ।**
**धारातीर्थे धरणीपतयो दानतीर्थे धनाढ्या**
**लज्जातीर्थे कुलयुवतयः पातकं क्षालयन्ति ॥४९॥**

विद्या-तीर्थे जगति विबुधाः साधवः सत्य-तीर्थे
गङ्गा-तीर्थे मलिन-मनसः योगिनः ध्यान-तीर्थे ।
धारा-तीर्थे धरणी-पतयः दान-तीर्थे धनाढ्या
लज्जा-तीर्थे कुल-युवतयः पातकम् क्षालयन्ति ॥

**श्रेयो नूनं व्रजति स पुमाञ्शिक्षया वर्धितो यः**
**स्वच्छन्दं यश्चरति स पराभूतिमाप्नोति काले ।**
**पूज्यो वेणुर्भवति च नतिं प्रापितो भूपतीना-**
**मन्यं नृत्तोचितमिति करे नर्तकाः कल्पयन्ति ॥५०॥**

श्रेयः नूनं व्रजति स पुमान् शिक्षया वर्धितः यः
स्वच्छन्दं यः चरति स परा-भूतिम् आप्नोति काले ।
पूज्यः वेणुः भवति च नतिम् प्रापितः भूपतीनाम्
अन्यम् नृत्त-उचितम् इति करे नर्तकाः कल्पयन्ति ॥५०॥

# शब्दरूपाणि

वाक्यार्थज्ञाने पदपदार्थज्ञानं कारणं भवति। अपदं न प्रयुञ्जीत इति वैयाकरणसम्प्रदाये प्रसिद्धम्। सुप्तिङन्तं पदम् इति पाणिनिसूत्रं सुप् एवञ्च तिङ् इत्यनयोः पदसंज्ञां प्रतिपादयति। अतः पाठ्यक्रमे शब्दरूपाणां एवं धातुरूपाणां स्थापनं विहितम्। छात्राणां कृते प्रथमस्तावत् शब्दरूपाणाम् अभ्यासः आवश्यकः। अतः इदानीं शब्दरूपाणाम् अभ्यासं कुर्मः।

| राम ( पुं. ) | | | |
|---|---|---|---|
| **V विभक्तिः/ वचनम् >** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | रामः | रामौ | रामाः |
| **द्वितीया** | रामम् | रामौ | रामान् |
| **तृतीया** | रामेण | रामाभ्याम् | रामैः |
| **चतुर्थी** | रामाय | रामाभ्याम् | रामेभ्यः |
| **पञ्चमी** | रामात् | रामाभ्याम् | रामेभ्यः |
| **षष्ठी** | रामस्य | रामयोः | रामाणाम् |
| **सप्तमी** | रामे | रामयोः | रामेषु |
| **सम्बोधनम्** | राम | रामौ | रामाः |

-----------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------

| हरि (पुं.) | | | |
|---|---|---|---|
| V विभक्तिः/ वचनम् > | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | हरिः | हरी | हरयः |
| **द्वितीया** | हरिम् | हरी | हरीन् |
| **तृतीया** | हरिणा | हरिभ्याम् | हरिभिः |
| **चतुर्थी** | हरये | हरिभ्याम् | हरिभ्यः |
| **पञ्चमी** | हरेः | हरिभ्याम् | हरिभ्यः |
| **षष्ठी** | हरेः | हर्योः | हरीणाम् |
| **सप्तमी** | हरौ | हर्योः | हरिषु |
| **सम्बोधनम्** | हरे | हरी | हरयः |

---------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------

| गुरु (पुं.) | | | |
|---|---|---|---|
| **V विभक्तिः/ वचनम् >** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | गुरुः | गुरू | गुरवः |
| **द्वितीया** | गुरुम् | गुरू | गुरून् |
| **तृतीया** | गुरुणा | गुरुभ्याम् | गुरुभिः |
| **चतुर्थी** | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| **पञ्चमी** | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| **षष्ठी** | गुरोः | गुर्वोः | गुरूणाम् |
| **सप्तमी** | गुरौ | गुर्वोः | गुरुषु |
| **सम्बोधनम्** | गुरो | गुरू | गुरवः |

---------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------

| पितृ (पुं.) | | | |
|---|---|---|---|
| V विभक्तिः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | पिता | पितरौ | पितरः |
| द्वितीया | पितरम् | पितरौ | पितॄन्/पितरः |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितॄणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |
| सम्बोधनम् | पितः | पितरौ | पितरः |

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

| गो (पुं.) | | | |
|---|---|---|---|
| V विभक्तिः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | गौः | गावौ | गावः |
| द्वितीया | गाम् | गावौ | गाः |
| तृतीया | गवा | गोभ्याम् | गोभिः |
| चतुर्थी | गवे | गोभ्याम् | गोभ्यः |
| पञ्चमी | गोः | गोभ्याम् | गोभ्यः |
| षष्ठी | गोः | गवोः | गवाम् |
| सप्तमी | गवि | गवोः | गोषु |
| सम्बोधनम् | गौः | गावौ | गावः |

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

| राजन् (पुं.) | | | |
|---|---|---|---|
| V विभक्तिः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | राजा | राजानौ | राजानः |
| द्वितीया | राजानम् | राजानौ | राज्ञः |
| तृतीया | राज्ञा | राजभ्याम् | राजभिः |
| चतुर्थी | राज्ञे | राजभ्याम् | राजभ्यः |
| पञ्चमी | राज्ञः | राजभ्याम् | राजभ्यः |
| षष्ठी | राज्ञः | राज्ञोः | राज्ञाम् |
| सप्तमी | राजनि/राज्ञि | राज्ञोः | राजसु |
| सम्बोधनम् | राजन् | राजानौ | राजानः |

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

| रमा (स्त्री.) | | | |
|---|---|---|---|
| V विभक्तिः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | रमा | रमे | रमाः |
| द्वितीया | रमाम् | रमे | रमाः |
| तृतीया | रमया | रमाभ्याम् | रमाभिः |
| चतुर्थी | रमायै | रमाभ्याम् | रमाभ्यः |
| पञ्चमी | रमायाः | रमाभ्याम् | रमाभ्यः |
| षष्ठी | रमायाः | रमयोः | रमाणाम् |
| सप्तमी | रमायाम् | रमयोः | रमासु |
| सम्बोधनम् | रमे | रमे | रमाः |

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

| नदी (स्त्री.) | | | |
|---|---|---|---|
| V विभक्तिः/ वचनम् > | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | नदी | नद्यौ | नद्यः |
| **द्वितीया** | नदीम् | नद्यौ | नदीः |
| **तृतीया** | नद्या | नदीभ्याम् | नदीभिः |
| **चतुर्थी** | नद्यै | नदीभ्याम् | नदीभ्यः |
| **पञ्चमी** | नद्याः | नदीभ्याम् | नदीभ्यः |
| **षष्ठी** | नद्याः | नद्योः | नदीनाम् |
| **सप्तमी** | नद्याम् | नद्योः | नदीषु |
| **सम्बोधनम्** | नदि | नद्यौ | नद्यः |

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

| मति (स्त्री.) | | | |
|---|---|---|---|
| V विभक्तिः/ वचनम् > | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | मतिः | मती | मतयः |
| **द्वितीया** | मतिम् | मती | मतीः |
| **तृतीया** | मत्या | मतिभ्याम् | मतिभिः |
| **चतुर्थी** | मतये/मत्यै | मतिभ्याम् | मतिभ्यः |
| **पञ्चमी** | मतेः/मत्याः | मतिभ्याम् | मतिभ्यः |
| **षष्ठी** | मतेः/मत्याः | मत्योः | मतीनाम् |
| **सप्तमी** | मत्याम्/मतौ | मत्योः | मतिषु |
| **सम्बोधनम्** | मते | मती | मतयः |

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

| धेनु (स्त्री.) | | | |
|---|---|---|---|
| V विभक्तिः/ वचनम् > | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | धेनुः | धेनू | धेनवः |
| **द्वितीया** | धेनुम् | धेनू | धेनूः |
| **तृतीया** | धेन्वा | धेनुभ्याम् | धेनुभिः |
| **चतुर्थी** | धेनवे/धेन्वै | धेनुभ्याम् | धेनुभ्यः |
| **पञ्चमी** | धेनोः/धेन्वाः | धेनुभ्याम् | धेनुभ्यः |
| **षष्ठी** | धेनोः/धेन्वाः | धेन्वोः | धेनूनाम् |
| **सप्तमी** | धेन्वाम्/धेनौ | धेन्वोः | धेनुषु |
| **सम्बोधनम्** | धेनो | धेनू | धेनवः |

-----------------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------------

| श्री (स्त्री.) | | | |
|---|---|---|---|
| V विभक्तिः/ वचनम् > | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | श्रीः | श्रियौ | श्रियः |
| **द्वितीया** | श्रियम् | श्रियौ | श्रियः |
| **तृतीया** | श्रिया | श्रीभ्याम् | श्रीभिः |
| **चतुर्थी** | श्रियै/श्रिये | श्रीभ्याम् | श्रीभ्यः |
| **पञ्चमी** | श्रियाः/श्रियः | श्रीभ्याम् | श्रीभ्यः |
| **षष्ठी** | श्रियाः/श्रियः | श्रियोः | श्रीणाम्/श्रियाम् |
| **सप्तमी** | श्रियि/श्रियाम् | श्रियोः | श्रीषु |
| **सम्बोधनम्** | श्रीः | श्रियौ | श्रियः |

-----------------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------------

| मातृ (स्त्री.) | | | |
|---|---|---|---|
| V **विभक्तिः/ वचनम् >** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | माता | मातरौ | मातरः |
| **द्वितीया** | मातरम् | मातरौ | मातॄः |
| **तृतीया** | मात्रा | मातृभ्याम् | मातृभिः |
| **चतुर्थी** | मात्रे | मातृभ्याम् | मातृभ्यः |
| **पञ्चमी** | मातुः | मातृभ्याम् | मातृभ्यः |
| **षष्ठी** | मातुः | मात्रोः | मातॄणाम् |
| **सप्तमी** | मातरि | मात्रोः | मातृषु |
| **सम्बोधनम्** | मातः | मातरौ | मातरः |

-----------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------

| अस्मद् ( अ ) | | | |
|---|---|---|---|
| V **विभक्तिः/ वचनम् >** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | अहम् | आवाम् | वयम् |
| **द्वितीया** | माम्/मा | आवाम्/नौ | अस्मान्/नः |
| **तृतीया** | मया | आवाभ्याम् | अस्माभिः |
| **चतुर्थी** | मह्यम्/मे | आवाभ्याम्/नौ | अस्मभ्यम्/नः |
| **पञ्चमी** | मत् | आवाभ्याम् | अस्मत् |
| **षष्ठी** | मम/मे | आवयोः/नौ | अस्माकम्/नः |
| **सप्तमी** | मयि | आवयोः | अस्मासु |

-----------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------

| युष्मद् ( अ ) | | | |
|---|---|---|---|
| V **विभक्तिः/ वचनम्** > | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | त्वम् | युवाम् | यूयम् |
| **द्वितीया** | त्वाम्/त्वा | युवाम्/वाम् | युष्मान्/वः |
| **तृतीया** | त्वया | युवाभ्याम् | युष्माभिः |
| **चतुर्थी** | तुभ्यम्/ते | युवाभ्याम्/वाम् | युष्मभ्यम्/वः |
| **पञ्चमी** | त्वत्/त्वत्तः | युवाभ्याम् | युष्मत् |
| **षष्ठी** | तव/ते | युवयोः/वाम् | युष्माकम्/वः |
| **सप्तमी** | त्वयि | युवयोः | युष्मासु |

| अदस् (पुं.) | | | |
|---|---|---|---|
| V **विभक्तिः/ वचनम्** > | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | असौ | अमू | अमी |
| **द्वितीया** | अमुम् | अमू | अमून् |
| **तृतीया** | अमुना | अमूभ्याम् | अमीभिः |
| **चतुर्थी** | अमुष्मै | अमूभ्याम् | अमीभ्यः |
| **पञ्चमी** | अमुष्मात् | अमूभ्याम् | अमीभ्यः |
| **षष्ठी** | अमुष्य | अमुयोः | अमीषाम् |
| **सप्तमी** | अमुष्मिन् | अमुयोः | अमीषु |

| अदस् (स्त्री.) | | | |
|---|---|---|---|
| V विभक्तिः/ वचनम् > | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | असौ | अमू | अमूः |
| **द्वितीया** | अमूम् | अमू | अमूः |
| **तृतीया** | अमुया | अमूभ्याम् | अमूभिः |
| **चतुर्थी** | अमुष्यै | अमूभ्याम् | अमूभ्यः |
| **पञ्चमी** | अमुष्याः | अमूभ्याम् | अमूभ्यः |
| **षष्ठी** | अमुष्याः | अमुयोः | अमूषाम् |
| **सप्तमी** | अमुष्याम् | अमुयोः | अमूषु |

-----------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------

| अदस् (नपुं.) | | | |
|---|---|---|---|
| V विभक्तिः/ वचनम् > | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | अदः | अमू | अमूनि |
| **द्वितीया** | अदः | अमू | अमूनि |
| **तृतीया** | अमुना | अमूभ्याम् | अमीभिः |
| **चतुर्थी** | अमुष्मै | अमूभ्याम् | अमीभ्यः |
| **पञ्चमी** | अमुष्मात्/अमुष्माद् | अमूभ्याम् | अमीभ्यः |
| **षष्ठी** | अमुष्य | अमुयोः | अमीषाम् |
| **सप्तमी** | अमुष्मिन् | अमुयोः | अमीषु |

-----------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------

## तद् (पुं.)

| V विभक्तिः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | सः | तौ | ते |
| **द्वितीया** | तम् | तौ | तान् |
| **तृतीया** | तेन | ताभ्याम् | तैः |
| **चतुर्थी** | तस्मै | ताभ्याम् | तेभ्यः |
| **पञ्चमी** | तस्मात् | ताभ्याम् | तेभ्यः |
| **षष्ठी** | तस्य | तयोः | तेषाम् |
| **सप्तमी** | तस्मिन् | तयोः | तेषु |

## तद् (स्त्री.)

| V विभक्तिः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | सा | ते | ताः |
| **द्वितीया** | ताम् | ते | ताः |
| **तृतीया** | तया | ताभ्याम् | ताभिः |
| **चतुर्थी** | तस्यै | ताभ्याम् | ताभ्यः |
| **पञ्चमी** | तस्याः | ताभ्याम् | ताभ्यः |
| **षष्ठी** | तस्याः | तयोः | तासाम् |
| **सप्तमी** | तस्याम् | तयोः | तासु |

| **तद् (नपुं.)** | | | |
|---|---|---|---|
| V **विभक्तिः/ वचनम्** > | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | तद्/तत् | ते | तानि |
| **द्वितीया** | तद्/तत् | ते | तानि |
| **तृतीया** | तेन | ताभ्याम् | तैः |
| **चतुर्थी** | तस्मै | ताभ्याम् | तेभ्यः |
| **पञ्चमी** | तस्मात् | ताभ्याम् | तेभ्यः |
| **षष्ठी** | तस्य | तयोः | तेषाम् |
| **सप्तमी** | तस्मिन् | तयोः | तेषु |

-----------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------

| **एतद् (पुं.)** | | | |
|---|---|---|---|
| V **विभक्तिः/ वचनम्** > | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | एषः | एतौ | एते |
| **द्वितीया** | एतम् | एतौ | एतान् |
| **तृतीया** | एतेन | एताभ्याम् | एतैः |
| **चतुर्थी** | एतस्मै | एताभ्याम् | एतेभ्यः |
| **पञ्चमी** | एतस्मात् | एताभ्याम् | एतेभ्यः |
| **षष्ठी** | एतस्य | एतयोः | एतेषाम् |
| **सप्तमी** | एतस्मिन् | एतयोः | एतेषु |

-----------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------

| एतद् (स्त्री.) | | | |
|---|---|---|---|
| V विभक्तिः/ वचनम् > | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | एषा | एते | एताः |
| **द्वितीया** | एताम् | एते | एताः |
| **तृतीया** | एतया | एताभ्याम् | एताभिः |
| **चतुर्थी** | एतस्यै | एताभ्याम् | एताभ्यः |
| **पञ्चमी** | एतस्याः | एताभ्याम् | एताभ्यः |
| **षष्ठी** | एतस्याः | एतयोः | एतासाम् |
| **सप्तमी** | एतस्याम् | एतयोः | एतासु |

| एतद् (नपुं.) | | | |
|---|---|---|---|
| V विभक्तिः/ वचनम् > | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | एतद्/एतत् | एते | एतानि |
| **द्वितीया** | एनद्/एनत्/एतद्/ एतत् | एने/एते | एनानि/एतानि |
| **तृतीया** | एनेन/एतेन | एताभ्याम् | एतैः |
| **चतुर्थी** | एतस्मै | एताभ्याम् | एतेभ्यः |
| **पञ्चमी** | एतस्मात् | एताभ्याम् | एतेभ्यः |
| **षष्ठी** | एतस्य | एनयोः/एतयोः | एतेषाम् |
| **सप्तमी** | एतस्मिन् | एनयोः/एतयोः | एतेषु |

| भवत् (पुं.) | | | |
|---|---|---|---|
| V विभक्तिः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | भवान् | भवन्तौ | भवन्तः |
| द्वितीया | भवन्तम् | भवन्तौ | भवतः |
| तृतीया | भवता | भवद्भ्याम् | भवद्भिः |
| चतुर्थी | भवते | भवद्भ्याम् | भवद्भ्यः |
| पञ्चमी | भवतः | भवद्भ्याम् | भवद्भ्यः |
| षष्ठी | भवतः | भवतोः | भवताम् |
| सप्तमी | भवति | भवतोः | भवत्सु |

-----------------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------------

| भवती (स्त्री.) | | | |
|---|---|---|---|
| V विभक्तिः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | भवती | भवत्यौ | भवत्यः |
| द्वितीया | भवतीम् | भवत्यौ | भवतीः |
| तृतीया | भवत्या | भवतीभ्याम् | भवतीभिः |
| चतुर्थी | भवत्यै | भवतीभ्याम् | भवतीभ्यः |
| पञ्चमी | भवत्याः | भवतीभ्याम् | भवतीभ्यः |
| षष्ठी | भवत्याः | भवत्योः | भवतीनाम् |
| सप्तमी | भवत्याम् | भवत्योः | भवतीषु |

-----------------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------------

| **सर्व (पुं.)** | | | |
|---|---|---|---|
| V **विभक्तिः/ वचनम् >** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | सर्वः | सर्वौ | सर्वे |
| **द्वितीया** | सर्वम् | सर्वौ | सर्वान् |
| **तृतीया** | सर्वेण | सर्वाभ्याम् | सर्वैः |
| **चतुर्थी** | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| **पञ्चमी** | सर्वस्मात्/सर्वस्माद् | सर्वाभ्याम् | सर्वेभ्यः |
| **षष्ठी** | सर्वस्य | सर्वयोः | सर्वेषाम् |
| **सप्तमी** | सर्वस्मिन् | सर्वयोः | सर्वेषु |

--------------------------------------------------------------------------------------------

--------------------------------------------------------------------------------------------

| **सर्वा (स्त्री.)** | | | |
|---|---|---|---|
| V **विभक्तिः/ वचनम् >** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | सर्वा | सर्वे | सर्वाः |
| **द्वितीया** | सर्वाम् | सर्वे | सर्वाः |
| **तृतीया** | सर्वया | सर्वाभ्याम् | सर्वाभिः |
| **चतुर्थी** | सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |
| **पञ्चमी** | सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |
| **षष्ठी** | सर्वस्याः | सर्वयोः | सर्वासाम् |
| **सप्तमी** | सर्वस्याम् | सर्वयोः | सर्वासु |

--------------------------------------------------------------------------------------------

--------------------------------------------------------------------------------------------

| सर्व (नपुं.) | | | |
|---|---|---|---|
| V विभक्तिः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | सर्वम् | सर्वे | सर्वाणि |
| द्वितीया | सर्वम् | सर्वे | सर्वाणि |
| तृतीया | सर्वेण | सर्वाभ्याम् | सर्वैः |
| चतुर्थी | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| पञ्चमी | सर्वस्मात्/सर्वस्माद् | सर्वाभ्याम् | सर्वेभ्यः |
| षष्ठी | सर्वस्य | सर्वयोः | सर्वेषाम् |
| सप्तमी | सर्वस्मिन् | सर्वयोः | सर्वेषु |

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

# धातुरूपाणि

व्याकरणशास्त्रे पञ्चानामङ्गानां परम्परा दृश्यते। अत एव पञ्चाङ्गं व्याकरणम् इत्यपि प्रथितम्। पञ्च अङ्गानि इमानि सन्ति - सूत्रपाठः धातुपाठः गणपाठः उणादिपाठः लिङ्गानुशासनञ्चेति। एतेषु पञ्चसु अङ्गेषु धातुपाठः अतिमहत्वपूर्णं स्थानं भजते। प्रायेण संस्कृतशब्दाः व्युत्पन्नाः इति प्रसिद्धा परम्परा। प्रायेण सर्वेषां शब्दानां व्युत्पत्तिः धातुभिः एव प्रदर्श्यते। उच्यते च - सर्वं च नाम धातुजमाह। अत एव संस्कृतव्याकरणे धातूनां महत्त्वं सर्वथा भवत्येव इति धिया अस्मिन् पाठ्यक्रमे पाणिनीयधातुपाठस्य प्रतिगणप्रतिनिधिभूतानां धातूनां रूपाणि प्रदत्तानि। येन छात्राः प्रतिगणस्य प्रकृत्यनुसारम् धातुरूपाणाम् अभ्यासं कुर्युः।

| **भू (भू) सत्तायाम् (भ्वादिः ) परस्मैपदी** | | | |
|---|---|---|---|
| **लट्** | | | |
| V **पुरुषः/ वचनम् >** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमपुरुषः** | भवति | भवतः | भवन्ति |
| **मध्यमपुरुषः** | भवसि | भवथः | भवथ |
| **उत्तमपुरुषः** | भवामि | भवावः | भवामः |
| **लिट्** | | | |
| V **पुरुषः/ वचनम् >** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमपुरुषः** | बभूव | बभूवतुः | बभूवुः |
| **मध्यमपुरुषः** | बभूविथ | बभूवथुः | बभूव |
| **उत्तमपुरुषः** | बभूव | बभूविव | बभूविम |

## लुट्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | भविता | भवितारौ | भवितारः |
| **मध्यमपुरुषः** | भवितासि | भवितास्थः | भवितास्थ |
| **उत्तमपुरुषः** | भवितास्मि | भवितास्वः | भवितास्मः |

## लृट्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | भविष्यति | भविष्यतः | भविष्यन्ति |
| **मध्यमपुरुषः** | भविष्यसि | भविष्यथः | भविष्यथ |
| **उत्तमपुरुषः** | भविष्यामि | भविष्यावः | भविष्यामः |

## लोट्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | भवतु/भवतात् | भवताम् | भवन्तु |
| **मध्यमपुरुषः** | भव/भवतात् | भवतम् | भवत |
| **उत्तमपुरुषः** | भवानि | भवाव | भवाम |

## लङ्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अभवत् | अभवताम् | अभवन् |
| **मध्यमपुरुषः** | अभवः | अभवतम् | अभवत |
| **उत्तमपुरुषः** | अभवम् | अभवाव | अभवाम |

## विधिलिङ्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | भवेत् | भवेताम् | भवेयुः |
| **मध्यमपुरुषः** | भवेः | भवेतम् | भवेत |
| **उत्तमपुरुषः** | भवेयम् | भवेव | भवेम |

## आशीर्लिङ्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | भूयात् | भूयास्ताम् | भूयासुः |
| **मध्यमपुरुषः** | भूयाः | भूयास्तम् | भूयास्त |
| **उत्तमपुरुषः** | भूयासम् | भूयास्व | भूयास्म |

## लुङ्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अभूत् | अभूताम् | अभूवन् |
| **मध्यमपुरुषः** | अभूः | अभूतम् | अभूत |
| **उत्तमपुरुषः** | अभूवम् | अभूव | अभूम |

## लृङ्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अभविष्यत् | अभविष्यताम् | अभविष्यन् |
| **मध्यमपुरुषः** | अभविष्यः | अभविष्यतम् | अभविष्यत |
| **उत्तमपुरुषः** | अभविष्यम् | अभविष्याव | अभविष्याम |

## अद (अद्) भक्षणे (अदादिः )

### परस्मैपदी

### लट्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अत्ति | अत्तः | अदन्ति |
| **मध्यमपुरुषः** | अत्सि | अत्थः | अत्थ |
| **उत्तमपुरुषः** | अद्मि | अद्वः | अद्मः |

### लिट्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | आद/जघास | आदतुः/जक्षतुः | आदुः/जक्षुः |
| **मध्यमपुरुषः** | आदिथ/जघत्थ/ जघसिथ | आदथुः/जक्षथुः | आद/जक्ष |
| **उत्तमपुरुषः** | आद/जघास/जघस | आदिव/जक्षिव | आदिम/जक्षिम |

### लुट्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अत्ता | अत्तारौ | अत्तारः |
| **मध्यमपुरुषः** | अत्तासि | अत्तास्थः | अत्तास्थ |
| **उत्तमपुरुषः** | अत्तास्मि | अत्तास्वः | अत्तास्मः |

### लृट्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अत्स्यति | अत्स्यतः | अत्स्यन्ति |
| **मध्यमपुरुषः** | अत्स्यसि | अत्स्यथः | अत्स्यथ |
| **उत्तमपुरुषः** | अत्स्यामि | अत्स्यावः | अत्स्यामः |

## लोट्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अत्तात्/अत्तु | अत्ताम् | अदन्तु |
| **मध्यमपुरुषः** | अत्तात्/अद्धि | अत्तम् | अत्त |
| **उत्तमपुरुषः** | अदानि | अदाव | अदाम |

## लङ्

| V **पुरुषः/ वचनम् >** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | आदत् | आत्ताम् | आदन् |
| **मध्यमपुरुषः** | आदः | आत्तम् | आत्त |
| **उत्तमपुरुषः** | आदम् | आद्व | आद्म |

## विधिलिङ्

| V **पुरुषः/ वचनम् >** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अद्यात् | अद्याताम् | अद्युः |
| **मध्यमपुरुषः** | अद्याः | अद्यातम् | अद्यात |
| **उत्तमपुरुषः** | अद्याम् | अद्याव | अद्याम |

## आशीर्लिङ्

| V **पुरुषः/ वचनम् >** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अद्यात् | अद्यास्ताम् | अद्यासुः |
| **मध्यमपुरुषः** | अद्याः | अद्यास्तम् | अद्यास्त |
| **उत्तमपुरुषः** | अद्यासम् | अद्यास्व | अद्यास्म |

| लुङ् | | | |
|---|---|---|---|
| V पुरुषः/ वचनम् > | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमपुरुषः** | अघसत् | अघसताम् | अघसन् |
| **मध्यमपुरुषः** | अघसः | अघसतम् | अघसत |
| **उत्तमपुरुषः** | अघसम् | अघसाव | अघसाम |

| लृङ् | | | |
|---|---|---|---|
| V पुरुषः/ वचनम् > | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमपुरुषः** | आत्स्यत् | आत्स्यताम् | आत्स्यन् |
| **मध्यमपुरुषः** | आत्स्यः | आत्स्यतम् | आत्स्यत |
| **उत्तमपुरुषः** | आत्स्यम् | आत्स्याव | आत्स्याम |

| हु (हु) दानादनयोः (जुहोत्यादिः ) | | | |
|---|---|---|---|
| **परस्मैपदी** | | | |
| **लट्** | | | |
| V पुरुषः/ वचनम् > | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमपुरुषः** | जुहोति | जुहुतः | जुह्वति |
| **मध्यमपुरुषः** | जुहोषि | जुहुथः | जुहुथ |
| **उत्तमपुरुषः** | जुहोमि | जुहुवः | जुहुमः |

| लिट् | | | |
|---|---|---|---|
| V **पुरुषः/ वचनम् >** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमपुरुषः** | जुहाव/जुहवामास/<br>जुहवाम्बभूव/<br>जुहवाञ्चकार | जुहुवतुः/<br>जुहवामासतुः/<br>जुहवाञ्चक्रतुः/<br>जुहवाम्बभूवतुः | जुहवामासुः/जुहुवुः/<br>जुहवाञ्चक्रुः/<br>जुहवाम्बभूवुः |
| **मध्यमपुरुषः** | जुहविथ/जुहोथ/<br>जुहवामासिथ/<br>जुहवाञ्चकर्थ/<br>जुहवाम्बभूविथ | जुहुवथुः/<br>जुहवामासथुः/<br>जुहवाञ्चक्रथुः/<br>जुहवाम्बभूवथुः | जुहवामास/<br>जुहुव/<br>जुहवाञ्चक्र/<br>जुहवाम्बभूव |
| **उत्तमपुरुषः** | जुहाव/<br>जुहवामास/<br>जुहवाम्बभूव/<br>जुहवाञ्चकार | जुहुविव/<br>जुहवामासिव/<br>जुहवाञ्चकृव/<br>जुहवाम्बभूविव | जुहुविम/<br>जुहवामासिम/<br>जुहवाञ्चकृम/<br>जुहवाम्बभूविम |

| लुट् | | | |
|---|---|---|---|
| V **पुरुषः/ वचनम् >** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमपुरुषः** | होता | होतारौ | होतारः |
| **मध्यमपुरुषः** | होतासि | होतास्थः | होतास्थ |
| **उत्तमपुरुषः** | होतास्मि | होतास्वः | होतास्मः |

| लृट् | | | |
|---|---|---|---|
| V **पुरुषः/ वचनम् >** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमपुरुषः** | होष्यति | होष्यतः | होष्यन्ति |
| **मध्यमपुरुषः** | होष्यसि | होष्यथः | होष्यथ |
| **उत्तमपुरुषः** | होष्यामि | होष्यावः | होष्यामः |

## लोट्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | जुहुतात्/जुहोतु | जुहुताम् | जुह्वतु |
| मध्यमपुरुषः | जुहुतात्/जुहुधि | जुहुतम् | जुहुत |
| उत्तमपुरुषः | जुहवानि | जुहवाव | जुहवाम |

## लङ्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अजुहोत् | अजुहुताम् | अजुहवुः |
| मध्यमपुरुषः | अजुहोः | अजुहुताम् | अजुहुत |
| उत्तमपुरुषः | अजुहवम् | अजुहुव | अजुहुम |

## विधिलिङ्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | जुहुयात् | जुहुयाताम् | जुहुयुः |
| मध्यमपुरुषः | जुहुयाः | जुहुयातम् | जुहुयात |
| उत्तमपुरुषः | जुहुयाम् | जुहुयाव | जुहुयाम |

## आशीर्लिङ्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | हूयात् | हूयास्ताम् | हूयासुः |
| मध्यमपुरुषः | हूयाः | हूयास्तम् | हूयास्त |
| उत्तमपुरुषः | हूयासम् | हूयास्व | हूयास्म |

| लुङ् | | | |
|---|---|---|---|
| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अहौषीत् | अहौष्टाम् | अहौषुः |
| मध्यमपुरुषः | अहौषीः | अहौष्टम् | अहौष्ट |
| उत्तमपुरुषः | अहौषम् | अहौष्व | अहौष्म |

| लृङ् | | | |
|---|---|---|---|
| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अहोष्यत् | अहोष्यताम् | अहोष्यन् |
| मध्यमपुरुषः | अहोष्यः | अहोष्यतम् | अहोष्यत |
| उत्तमपुरुषः | अहोष्यम् | अहोष्याव | अहोष्याम |

## दिवु क्रीडाविजिगीषाव्यावहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु (दिव्) (दिवादिः )

### परस्मैपदी

| लट् | | | |
|---|---|---|---|
| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | दीव्यति | दीव्यतः | दीव्यन्ति |
| मध्यमपुरुषः | दीव्यसि | दीव्यथः | दीव्यथ |
| उत्तमपुरुषः | दीव्यामि | दीव्यावः | दीव्यामः |

## लिट्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | दिदेव | दिदिवतुः | दिदिवुः |
| **मध्यमपुरुषः** | दिदेविथ | दिदिवथुः | दिदिव |
| **उत्तमपुरुषः** | दिदेव | दिदिविव | दिदिविम |

## लुट्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | देविता | देवितारौ | देवितारः |
| **मध्यमपुरुषः** | देवितासि | देवितास्थः | देवितास्थ |
| **उत्तमपुरुषः** | देवितास्मि | देवितास्वः | देवितास्मः |

## लृट्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | देविष्यति | देविष्यतः | देविष्यन्ति |
| **मध्यमपुरुषः** | देविष्यसि | देविष्यथः | देविष्यथ |
| **उत्तमपुरुषः** | देविष्यामि | देविष्यावः | देविष्यामः |

## लोट्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | दीव्यतु/दीव्यतात् | दीव्यताम् | दीव्यन्तु |
| **मध्यमपुरुषः** | दीव्य/दीव्यतात् | दीव्यतम् | दीव्यत |
| **उत्तमपुरुषः** | दीव्यानि | दीव्याव | दीव्याम |

## लङ्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अदीव्यत् | अदीव्यताम् | अदीव्यन् |
| **मध्यमपुरुषः** | अदीव्यः | अदीव्यतम् | अदीव्यत |
| **उत्तमपुरुषः** | अदीव्यम् | अदीव्याव | अदीव्याम |

## विधिलिङ्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | दीव्येत् | दीव्येताम् | दीव्येयुः |
| **मध्यमपुरुषः** | दीव्येः | दीव्येतम् | दीव्येत |
| **उत्तमपुरुषः** | दीव्येयम् | दीव्येव | दीव्येम |

## आशीर्लिङ्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | दीव्यात् | दीव्यास्ताम् | दीव्यासुः |
| **मध्यमपुरुषः** | दीव्याः | दीव्यास्तम् | दीव्यास्त |
| **उत्तमपुरुषः** | दीव्यासम् | दीव्यास्व | दीव्यास्म |

## लुङ्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अदेवीत् | अदेविष्टाम् | अदेविषुः |
| **मध्यमपुरुषः** | अदेवीः | अदेविष्टम् | अदेविष्ट |
| **उत्तमपुरुषः** | अदेविषम् | अदेविष्व | अदेविष्म |

| लृङ् | | | |
|---|---|---|---|
| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अदेविष्यत् | अदेविष्यताम् | अदेविष्यन् |
| मध्यमपुरुषः | अदेविष्यः | अदेविष्यतम् | अदेविष्यत |
| उत्तमपुरुषः | अदेविष्यम् | अदेविष्याव | अदेविष्याम |

| षुञ् (सु) अभिषवे (स्वादिः ) | | | |
|---|---|---|---|
| परस्मैपदी | | | |
| लट् | | | |
| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | सुनोति | सुनुतः | सुन्वन्ति |
| मध्यमपुरुषः | सुनोषि | सुनुथः | सुनुथ |
| उत्तमपुरुषः | सुनोमि | सुन्वः/सुनुवः | सुन्मः/सुनुमः |
| लिट् | | | |
| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | सुषाव | सुषुवतुः | सुषुवुः |
| मध्यमपुरुषः | सुषविथ/सुषोथ | सुषुवथुः | सुषुव |
| उत्तमपुरुषः | सुषाव/सुषव | सुषुविव | सुषुविम |

| लुट् | | | |
|---|---|---|---|
| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | सोता | सोतारौ | सोतारः |
| मध्यमपुरुषः | सोतासि | सोतास्थः | सोतास्थ |
| उत्तमपुरुषः | सोतास्मि | सोतास्वः | सोतास्मः |

## लृट्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | सोष्यति | सोष्यतः | सोष्यन्ति |
| **मध्यमपुरुषः** | सोष्यसि | सोष्यथः | सोष्यथ |
| **उत्तमपुरुषः** | सोष्यामि | सोष्यावः | सोष्यामः |

## लोट्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | सुनुतात्/सुनोतु | सुनुताम् | सुन्वन्तु |
| **मध्यमपुरुषः** | सुनु/सुनुतात् | सुनुतम् | सुनुत |
| **उत्तमपुरुषः** | सुनवानि | सुनवाव | सुनवाम |

## लङ्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | असुनोत् | असुनुताम् | असुन्वन् |
| **मध्यमपुरुषः** | असुनोः | असुनुतम् | असुनुत |
| **उत्तमपुरुषः** | असुनवम् | असुन्व/असुनुव | असुन्म/असुनुम |

## विधिलिङ्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | सुनुयात् | सुनुयाताम् | सुनुयुः |
| **मध्यमपुरुषः** | सुनुयाः | सुनुयातम् | सुनुयात |
| **उत्तमपुरुषः** | सुनुयाम् | सुनुयाव | सुनुयाम |

## आशीर्लिङ्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | सूयात् | सूयास्ताम् | सूयासुः |
| मध्यमपुरुषः | सूयाः | सूयास्तम् | सूयास्त |
| उत्तमपुरुषः | सूयासम् | सूयास्व | सूयास्म |

## लुङ्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | असावीत् | असाविष्टाम् | असाविषुः |
| मध्यमपुरुषः | असावीः | असाविष्टम् | असाविष्ट |
| उत्तमपुरुषः | असाविषम् | असाविष्व | असाविष्म |

## लृङ्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | असोष्यत् | असोष्यताम् | असोष्यन् |
| मध्यमपुरुषः | असोष्यः | असोष्यतम् | असोष्यत |
| उत्तमपुरुषः | असोष्यम् | असोष्याव | असोष्याम |

## आत्मनेपदी

## लट्

| V पुरुषः/ वचनम् > | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | सुनुते | सुन्वाते | सुन्वते |
| मध्यमपुरुषः | सुनुषे | सुन्वाथे | सुनुध्वे |
| उत्तमपुरुषः | सुन्वे | सुन्वहे/सुनुवहे | सुन्महे/सुनुमहे |

| लिट् | | | |
|---|---|---|---|
| V पुरुषः/ वचनम् > | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमपुरुषः** | सुषुवे | सुषुवाते | सुषुविरे |
| **मध्यमपुरुषः** | सुषुविषे | सुषुवाथे | सुषुविढ्वे/सुषुविध्वे |
| **उत्तमपुरुषः** | सुषुवे | सुषुविवहे | सुषुविमहे |

| लुट् | | | |
|---|---|---|---|
